CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वीशतकम्

खण्डकाव्यम्



जयतु संस्कृतम्

केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः

दूरभाषः ०१-५७०५३७१

काव्यकारः

प्रा.डा. नवराजकट्टेलः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतमिति संस्थायाः पञ्चत्रिंशत्तमं (३५) प्रकाशनम्

पृथ्वीशतकम्

(खण्डकाव्यम्)

काव्यकारः
प्रा. डा. नवराजकट्टेलः

प्रकाशकम्
जयतु संस्कृतम्
नेपालः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रन्थस्य नाम - पृथ्वीशतकं खण्डकाव्यम् ।
रचनाकारः - प्रा.डा. नवराजकट्टेलः ।
प्रकाशकम् - जयतु संस्कृतम् ।
प्रकाशनसौज़न्यम् - आचार्यपीलिमणिसिग्देलः ।
प्रकाशनमितिः - २०८२।३।११। (नेपाले समायोजितस्य एकोनविंशतितमस्य विश्वसंस्कृतसम्मेनस्य (२०८२।३। १२-१६) शुभावसरे)
प्रकाशनप्रतयः - पञ्चशतम् (५००)
सर्वाधिकारः - रचनाकारे ।
मुद्रकः - किशोर अफसेट मुद्रणालयः, काष्ठमण्डपो नेपालः ।
मूल्यम् - रूप्यकं ४००।-
ISBN - 978-9937-9902-1-9

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

२००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्मराजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं रक्षति। २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्छात्रावासस्य वा अग्रे स्मारकस्तम्भः स्थापितः।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नेपाल्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्यशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतं इति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालये अन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासाः जायममानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते। उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने,. तत्र

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रेरणाप्रदाने संस्थेयं सदा जागरुका अस्ति। संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते।

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्य पर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति। १ पं. भीमकान्तपन्थी (२०५६,जगदम्बिकावैभव. महाकाव्यम्) २.पं धनञ्जयमरासिनी (२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्य), ३. डा हरिहरशर्म-अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४ प्रा.डा. माधव भट्टराई (२०५८), सत्यशाइ-चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधव ढकाल (२०६०) लिच्छविकालिकाना-मभिलेखानां साहित्यिकं परिशीलनम्), ६. भैषज्य गोपाल वैद्य किंजल्क (२०६१ हिमाद्रिमहिमा काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचार-सानुवादः) ८. प्रा.डा. टीकाराम अधिकारी (२०६५, पद्यपुष्पाञ्जलिः, संस्कृतकविता-संग्रहः), ९. पं. लोकनाथलुइँटेलः (२०६६,श्रीरामशरणं मम,काव्यम्), १० प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः (काव्यकविता, उपराष्ट्रपतिभवन), ११ प्रा. टीकादत्तबरालः; (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२.प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३,गतो मदीयो ननु कुत्र देशः, संस्कृतभारतीगौरवम्), १४.डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च ४००० श्लोकाः),१५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश ०८१।५।७ राष्ट्रपतिभवन), १६.आचार्य पूर्णचन्द्रढुङ्गेल, २०७९, देवाधिदेवमहादेवश्रीनीलकण्ठमहाकाव्यम् (०८१।५।७)

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति। तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः। २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ। खेमराजकेशवशरणः काष्ठमण्डपं समागन्तुमशक्यत्वात् सचिवो नवराजकट्टेलः, अपाध्यक्षो विष्णुप्रसाददेवकोटा देवघट्टे गत्वा सम्मानं कृतवन्तौ। २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा विद्यानाथोपाध्यायः(तन्त्रन्यायविद्याकेशरि), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरि), प्रा.पुरुषोत्तमभट्टराई

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(न्यायविद्याकेशरि) च सम्मानिताः। २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसो सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरि), प्रा.डा. रामचन्द्रगौतमः (धर्मशास्त्रविशारदः), प्रा.डा. गोपिवन्दचौधरी (न्यायविद्याकेशरि), प्रा. चेतोनाथ आचार्यः (प्रमाणशास्त्रविशारदः)।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ खीष्टाब्दे अत्र सम्मेलनं सञ्जातञ्चेत् तेन २०२४ तमे खीष्टाब्दे नेपाले तत्सम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य नेपाले सम्पादनाय एका संयोजनसमितिश्च सङ्घटिता वर्तते। इदमपि कार्यं संस्थायाः सक्रियतायां सञ्जातम् इति आस्माकीनो विश्वासः।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिः महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतः।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्य उद्देश्यस्य मूलाधारे समाविष्टास्ति। तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति। संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थनिर्माण-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं, सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकानां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि प्रकाशितानि भवन्ति च। अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च समकारि। कट्टेलस्य 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च।

अहं नवराजकट्टेलमहोदयं २०४० वैक्रमाब्दादेव जानामि, परिचिनोमि च, परन्तु अहं नेपालसर्वकारस्य सेवायां वर्तमानोऽनेकेषु जनपदेषु मम सेवाव्यवस्थापनमभूत्। अतो मया तेन साकं पर्याप्तसम्पर्कस्यावसरो नैव प्राप्तः। अथ च २०५४तमे वैक्रमाब्दे 'जयतु संस्कृतमान्दोलनं २००४' इत्यस्य स्वर्णमहोत्सवसमारोहे एकस्यामेव समित्यां स्थित्वा कार्यसम्पादनस्यावसरो लब्धः। तस्मिन् समये स सदस्यसचिवत्वेन कार्यं सम्पादयन्नासीत्।

ततोऽद्यपर्यन्तं आवां एकस्यामेव समित्यां स्थित्वा संस्कृतवाङ्मयस्य, पौरस्त्यसंस्कृतेश्च विकासाय, संरक्षणाय, संवर्द्धनाय च कार्यं कुर्वन्तौ स्वः। नवराकट्टेलः ममानुजः स्पृहणीयव्यक्तित्वञ्चास्ति।

काष्ठमण्डपे नेपालवेदविद्याश्रमे चत्वारि वर्षाणि समधीत्य एकोनविंशत्यां वयसि रानीपोखरीसंस्कृतमाध्यमिकविद्यालयेऽयं पठनाय सन्नद्धो जातः। तदनु पूर्वमध्यमापरीक्षां समुत्तीर्य त्रिभुवनविश्वविद्यालयस्य वाल्मीकिविद्यापीठे प्रवीणताप्रमाणपत्रस्य कक्षायां पठित्वा परीक्षाञ्च समुत्तीर्य ततः एव प्रथमश्रेण्यां शास्त्रिकक्षा च समुत्तीर्णा। तदनु नेपालिविषयमवलम्व्य प्रथमश्रेण्यां स्नातकोत्तरकक्षा, शिक्षाशास्त्रिकक्षा च समुत्तीर्णा। तदनु कट्टेलः नेपालसंस्कृतविश्वविद्यालये नेपालिविषयस्य उपप्राध्यापकत्वेन नियुक्तो जातः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्पश्चादयं पाठयन् पठञ्च नेपालसंस्कृतविश्वविद्यालयत आचार्यकक्षा समुत्तीर्य विद्यावारिधिञ्च कृतवान्। तदनु नेपालसंस्कृतविश्वविद्यालयस्य प्राध्यापकपदस्य प्रतिस्पर्धायां विजयं लब्ध्वा प्राध्यापकश्च जातः।

छात्रजीवनादेव डा. कट्टेलः सामाजिक-राजनीतिक-साहित्यिकगिविधिषु सक्रियो भूत्वा समागतः, अद्यपर्यन्तं स संस्कृतभाषासाहित्यसंस्कृतिसंरक्षणाय, संवर्द्धनाय सक्रियो दरीदृश्यते। छात्रजीवनादेव सः 'संस्कृतच्छात्रसंघः २००४' इत्यस्य पुनः संरचनायां पुनर्जीवनाय च सक्रियो जातः। तदनु ह्यनेन वाल्मीकिविद्यापीठस्य छात्रसङ्घस्य (स्ववियू २०४०-०४२) निर्वाचनं विजित्य सचिवपदे स्थित्वानेकानि कार्याणि व्यधायिषत। कार्यसम्पादनावसरे सर्वकारेण अनेकावरोधान् कुर्वता अल्पावधिकेन दीर्घावधिकरूपेण च कारागारेऽपि पातितोऽयम् । अनेकेषु प्रजातान्त्रिकान्दोलनेषु चास्य संलग्नता दृश्यते।

प्रा.डा. कट्टेलोऽयमनेकासु समितिषु स्थित्वाऽनेकानि कार्याणि सम्पादितवान्। स तीनधारासंस्कृतछात्रावास-शतवार्षिकसमित्यां (विसं २०४२) सचिवो भूत्वा कार्याणि समकरोत्। तदवसरे स्थापितं शिलापत्रमधुनापि तत्रैव विलसति, तत्र गत्वा पठितुं शक्यते च। तथैव स 'जयतु संस्कृतम् आन्दोलन २००४ स्वर्णमहोत्सव-समारोह -आयोजक-समित्यां सर्वसम्मत्या सचिवपदे नियुक्तः आसीत्। तदवसरे विविधसाप्ताहिककार्यक्रमाणां, वार्षिककार्यक्रमाणाञ्च सम्पादनेऽनेन महत्त्वपूर्णा भूमिका निर्व्यूढासीत्। अनया समित्या स्मारिका प्रकाशिता, स्मारकस्तम्भः स्थापितः, जयतु संस्कृतमिति स्थायिसंस्था च सङ्घटिता। एवञ्चानेन नेपालसंस्कृत-विश्वविद्यालयस्य प्राध्यापकसङ्घस्य केन्द्रीयसमितेरध्यक्षपदे स्थित्वा च संस्कृतवाङ्मयस्य विकासाय अनेकानि कार्याणि सम्पादितानि। तथैव नेपालप्राध्यापकसङ्घस्य केन्द्रीयसदस्यपदे स्थित्वा च नेपालस्य विश्वविद्यालयानां सत्स्थितिस्थापनाय अनेकाः प्रयाशाः विहिताः। एवञ्चानेन नेपालसंस्कृतविश्वविद्यालयस्य सभासदो भूत्वा, प्राज्ञिक परिषदि च स्थित्वा संस्कृतस्य पक्षपोषणाय चानेकानि कार्याणि विहितानि। अथ च नेपालसर्वकारस्य पाठ्यक्रमविकासकेन्द्रस्य नेपालिविषयसमित्यां स्थित्वा नेपालिविषयस्य पाठ्यक्रम-पाठ्यपुस्तकसम्पादने, संस्कृतस्य पाठ्यक्रमपाठ्यपुस्तकसम्पादने च सोऽयं कट्टेलः सक्रियो जातः।

जयतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनायाम्, अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाणा अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव ।

प्रा.डा.कट्टेलमहाभागेन नेपालिभाषायां कविताः, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते । तद्वद् कट्टेलस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति। गोरखापत्रे चायं संस्कृतभाषापृष्ठसंयोजकसम्पादकत्वेन विराजते। इतः पूर्वसमयेऽपि 'नेपाली कथा र उपन्यास : एक अनुशीलन' (वि.सं २०७३), 'उपन्यास समीक्षा' (वि.सं.२०७८), 'संस्कृतकाव्यसिद्धान्त-समीक्षा' (वि.सं.२०७८) 'पण्डित दधिराम पौडेलका व्याकरणात्मक कृतिको अध्ययन' .(वि.सं.२०७९) इति पुस्तकानि प्रकाशितानि विलसन्ति। अन्यान्यनेकानि दशाधिकानि पुस्तकानि चानेन सम्पादितानि सन्ति। तानि पुस्तकानि नेपालप्रज्ञाप्रतिष्ठानतः, साझाप्रकाशनतः, जयतु संस्कृतम् इति संस्थातश्च प्रकाशितानि विलोक्यन्ते ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमास्ति। रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमानाः सन्ति। प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति। संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते। पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते। संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव। अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत्। तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति ।

नेपाले संस्कृतभाषायां नारीणां रचना नैव दृश्यते। अतो नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायामग्रे आगच्छन्तु इति धिया तासां प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति। अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति। अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवृता सदस्या सदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनायै

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायासु तासां प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती। एवञ्च नारीप्रतिभायाः सम्माने काष्ठमाण्डपस्य डिल्लिबजारस्था उद्यमशीला श्रीमती इन्दिरासापकोटा च अक्षयकोषस्य स्थापना कृतवती। तयोः कोषयोः यथोचितव्यवस्था च विहितास्ति। नेपाल- संकृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ताः काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति। अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति।

अस्य खण्डकाव्यस्य प्रकाशने सिन्धुपलान्चोकजनपदे लब्धजन्म अद्यतनसमये अमेरिकादेशे क्रियाशीलः आचार्यः श्रीपीपलमणिसिग्देलः श्रीमती प्रतिमासिग्देलश्च आर्थिकसहयोगं कृतवन्तौ स्तः। एताभ्यां मनस्विभ्यां दानवीराभ्यामं, दम्पतीभ्याञ्च जयतु संस्कृतं संस्था हार्दं धन्यवादं कृतज्ञताञ्च ज्ञापयति। सिग्देलः जयतु संस्कृतमिति संस्थायाः आजीवनसदस्यश्चास्ति। स चायमाचार्यः पिपलमणिसिग्देलः २०३६ तमे वैक्रमाब्दस्य मार्गशीर्षमासे डिलकुमारी-डिल्लीरामसिग्देलयोः पुत्रत्वेन सिन्धुपाल्चोकजनपदस्य सिन्धुकोटग्रामे समजनि। तेन उमानाथमायादेवीखनालयोः पुत्री प्रतिमाखनालः वैदिकविधिद्वारा प्रणीतास्ति। तयोः प्रयास-पीयूषौ पुत्रौ स्तः। अधुना सिग्देलस्य परिवारः कार्यं कुर्वन् अमेरिकादेशस्य न्यूयोर्कनगरे निवसति। तत्रापि स सनातनवैदिकधर्मस्य प्रचारप्रसारं, धार्मिकदार्शनिकप्रवचनञ्च कृत्वा जीवनं यापयन्नस्ति।

सिग्देलमहोदयेन रानीपोखरीसंस्कृतमाध्यमिकविद्यालये समधीत्य मध्यमां समुत्तीर्य वाल्मीकिविद्यापीठतः साहित्यविषये शास्त्रीकक्षा, बौद्धदर्शने आचार्यपरीक्षा च समुत्तीर्णा। अथ चानेन त्रिभुवनविश्वविद्यालयतः नेपालीविषये स्नातकोत्तरस्तर (एम.ए.) परीक्षा च समुत्तीर्णा, पत्रकारिताविषयमवलम्ब्य अनेन स्नातकस्तरश्च समुत्तीर्णञ्चेत् एकवर्षीयशिक्षाशास्त्रिकक्षा च समुत्तीर्णा। आङ्ग्लसाहित्ये चानेन स्नातको विहितः। एवञ्च अनेकेषु प्रशिक्षणकार्येषु च प्रशिक्षितोऽयं सिग्देलः मृदुभाषी, सङ्घटनकुशलो, प्रवचनदक्षश्चास्ति। अमेरिकादेशे च सईसीए-विश्वविद्यालयेन मानार्थं विद्यावारिध्युपाधिद्वारा अलङ्कृतश्च वर्तते ।

छात्रजीवनान्तरं वाल्मीकिविद्यापीठे सहायकप्राध्यापकपदे स्थित्वा कतिचिद् वर्षाणि सः समपाठयत् । जयतु संस्कृतम् इति संस्थायामपि स्थित्वा कार्याणि सम्पादितवान् । छात्रजीवनेऽपि सोऽयं सिग्देलः छात्रनेतृत्वेन विविधस्थानेषु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विविधपदेषु स्थित्वा कार्याणि कृतवान्। स वाल्मीकिविद्यापीठस्य छात्रसङ्घस्य सभापतिः भूत्वा, ने.वि.सङ्घस्य केन्द्रीयसमितेः उपसमित्याञ्च स्थित्वा कार्याणि विहितवान्। वाल्मीकिविद्यापीठस्य स्वतन्त्रविद्यार्थीयूनियन इत्यत्र च कदा सदस्यो भूत्वा कदा सचिवपदे निर्वाचितो भूत्वा अनेकानि कार्याणि सम्पादितानि। लोकतन्त्रस्यान्दोलने च विविधकार्याणि विहितानि। अनेन अध्यापनजीवनेऽपि प्राध्यापकसङ्घस्य विविधपदेषु स्थित्वा कार्यमकारि। अमेरिकादेशे समागत्य अनवनसीयेतरनेपालीसमाजे नेपाली-गैर-आवासीयसमाजे च 'नेपाली संस्कृति संरक्षण तथा प्रचारप्रसार समिति' इत्यत्र स्थित्वा सम्यक्तया कार्याणि समकरोत् सिग्देलः।

पिपलमणिसिग्देलः छात्रजीवनादेव कवितानिबन्धादिलेखने, प्रवचने च जिज्ञासुरासीत्। विविधासु प्रतियोगितासु स पुरस्कृतश्च। अनेके लेखाः अनेन व्यरचि, कविता लिखिता, गजलं वाचितं, वक्तृता प्रस्तुता च। अनेन 'आँकुरापुञ्ज' नामकः कवितासङ्ग्रहः (२०७५) प्रकाशितश्चेत् २०८० तमे वैक्रमाब्दे 'विचारपुञ्ज'श्च प्रकाशितः। विचरापुञ्जे षट्खण्डानि सन्ति। तत्र साहित्य-धर्मसंस्कृति-लेख-दर्शन-संस्कृत-कविता-खण्डानि संयोजितानि सन्ति। संस्कृतखण्डे निबन्धः, संस्कृतनाटकम्, कविता च प्रकाशिताः सन्ति। द्विशताधिकाः अनेके च लेखाः विविधासु पत्रिकासु प्रकाशिताः प्रकाश्यमानाश्च सन्ति। तस्य प्रतिभायाः उत्तरोत्तरं प्रस्तारं भूयादित्यहमाशासे।

तथैव अस्य खण्डकाव्यस्य प्रकाशनाय काव्यं विलेक्य शुभकामनालेखनपुरस्सरं भाषिकत्रुटिपरिष्काराय विमर्शप्रदानपुरस्सरं कृतभूरिपरिश्रमाय प्रा.डा. विष्णुप्रसादशर्म-देवकोटावराय एवञ्च प्रा. रामहरिदाहालवराय प्रा.डा.मुकुन्दलामिछाने-महोदयाय च हार्दं धन्यवादं कृतज्ञताञ्च प्रकटयामि। अस्य खण्डकाव्यस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रणयिनो धन्यवादार्हाः। जयतु संस्कृतम्।

अध्यक्षः
डा. बद्रीपोखेलः
जयतु संस्कृतम्, नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वीशतकं प्रति मदीया दृष्टिः

प्रा. डा. विष्णुप्रसाददेवकोटा

१. पुरोवाक्

पृथ्वीशतकमिति नाम्ना एवेदं काव्यम्, तत्रापि खण्डकाव्यमिति दृष्टिः स्थिरा भवति,केवलेन शतेन पद्यैः पूर्णस्य महाकाव्यस्या-सम्भवात्। अस्य च खण्डकाव्यस्य कर्त्ता रचयिता वा प्राध्यापको नवराजकट्टेलनामा। अयं नेपालीभाषाया विद्वानपि संस्कृतमपि जिज्ञासते श्रद्धधाति तद्भाषायां कृतीश्च लिखति । अत एव च संस्कृतवाङ्मयेऽपि भाषणे लेखने च पाटवं समर्जयति सः। संस्कृतपटुतायाः समर्जनकमे रचनासंख्यावृद्धये राजनि पृथ्वीनारयणे श्रद्धां प्रदर्शयितुञ्च प्रकृतस्य खण्डकाव्यस्य लेखने प्रवृत्तोऽयं विद्वान् ।

जयतु संस्कृतमिति संस्थया प्रकाशिते संस्कृतकवितासंग्रहे प्रकाशिता अनेका रसभावमयचः कविताः सन्त्यस्य विदुषः। मातृशतकं मातृशतकमित्यपि खण्डकाव्यं लिखितमनेन। अन्या अपि रचनाः संस्कृतेऽस्य वर्त्तन्त एव। अथ च संस्कृतभाषायां दक्षताया रचनापाटवस्य चास्य विदुषो नवीनं प्रमाणमस्ति मासात्पूर्वं प्रकाशितः कर्मफलमित्यभिधः संस्कृत -रूपकसङ्ग्रहः। अयं कविकर्मकुशलो रचनापटुश्च संस्कृतं तु प्रणयत्येव स्वसंस्कृति-संस्कार-धर्मानपि प्रणयति। अथ च गौरवमयं वीरतापूर्णं स्वेतिहासमपि स्निह्यति। गौरवाञ्चितस्य वीरतापूर्णस्य स्वकीयस्येतिहासस्य प्रणयस्य कारणादेव तत्रापि राष्ट्रनिर्मातुर्महाराजस्य पृथ्वीनारायणस्य राष्ट्रस्यैकीकरणकार्यस्य तत्र कार्ये प्रदर्शितस्य शौर्यस्य च राष्ट्रस्य कृते महत्त्वपूर्णतां प्रदर्शयितुं खण्डकाव्यमिदं लिखितमनेन विदुषा। अस्य खण्डकाव्यत्वाद् देशस्यैकीकर्त्तुर्महाराजस्य पृथ्वीनारायणस्य विशेषता अपि खण्डीकृताः स्वल्पा वा वर्णिताः सन्ति।

२. काव्यप्रयोजनम्

काव्यलेखनमपि सोद्देश्यं भवति। अत एव 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते' इति विदुषां विचारः। काव्यस्य यत्प्रयोजनं तदेव खण्डकाव्यस्यापि काव्याङ्गत्वात्तस्य। अत एवोक्तं मम्मटेन काव्यलक्षणकारेण-इहाभिधेयं सप्रयोजनमिति काव्यप्रयोजनप्रति-पादने काव्यप्रकाशे। काव्यप्रयोजनानि चानेकानि सन्ति। तानि च सर्वाणि मम्मटप्रयोजनेषु अन्तर्भूतानि प्रायेण। मम्मटीयानि च तानीमानि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥ इति ॥

सर्वतः प्रथमं काव्यं खलु कवेर्यशसे भवति । अर्थकृते भवति -धनकरणाय भवति, पुरस्कारादीनां प्राप्त्या कृतिविक्रीति -मूल्यादानाच्च । अर्थकृते इति पदस्य मूलञ्च अर्थकृदिति पदम् । अस्य चतुर्थ्येकवचने रूपमिदम् । तत्पदञ्च अर्थकरणमिति विग्रहे क्विपि ङेविभक्तौ सिद्धं भवति । मम्मटाभिप्रेतं द्वितीयं काव्यप्रयोजनमिदम् । काव्यं व्यवहारविदे च भवति । अस्य च व्यवहारज्ञानायेत्यर्थः । व्यवहारविदा लिखितस्य काव्यस्याध्ययनेनाध्येतापि व्यवहारविदेव भवति । व्यवहारविदे इति पदञ्च व्यवहारवेदनमिति विग्रहे, वेदनमिति वित्, व्यवहाराणां विदिति विग्रहे वा सिद्धं निष्पन्नं वा भवति । शिवेतरक्षतये-अमङ्गलनाशाय सद्यःपरनिर्वृतये-श्रवणपठनाभ्या-मनन्तरमेव परमानन्द-प्राप्तये, कान्तासम्मिततयोपदेशयुजे-सर्वोपयुक्तोपदेशाय च काव्यं भवति । एवञ्च सत्काव्यं यशोदं भवति, व्यवहारसञ्चालकस्यार्थस्योपार्जकं भवति, व्यवहारज्ञापकं भवति, अकल्याण-नाशकं भवति, सद्य उत्कृष्टानन्दजनकं भवति, युक्तोपदेशकं कान्तासम्मितोपदेशकं वा भवतीति प्रयोजनषट्कं काव्यस्य । तच्च सर्वसेव्यं सदा सेव्यं भवति ।

काव्यं पूर्वं लिख्यते ततः पठ्यते । काव्यकरणस्य काव्याध्ययनस्य लग्नस्यालग्नस्य प्रयोजनस्य विश्लेषणन्तु एवमवधेयं काव्यस्य षट्सु प्रयोजनेषु यशसः प्राप्तिरर्थागमोऽनर्थनिवृत्तिश्च काव्यकरणस्य प्रयोजनानि भवन्ति । व्यवहारज्ञानं कान्तासम्मितो-पदेशश्च काव्याध्ययनस्य प्रयोजने भवतः । परमानन्दसहोदरानन्दप्राप्त्या तूभौ लाभान्वितौ भवत इति । अर्थात् यशोऽधिगमनार्थ-प्राप्त्यनर्थनिवृत्तिभिः कविर्महाकविर्वा लाभान्वितो भवति चेद् व्यवहारज्ञान- कान्तासम्मितोपदेशाभ्यां काव्याध्येता लाभान्वितो भवति । परमानन्दसहोदरानन्देन तु काव्यरचयिता काव्याध्येता च लाभान्वितौ भवत इति । इदं विश्लेषणं प्रकृते खण्डकाव्येऽपि सङ्गमनीयम् । एषु काव्यप्रयोजनेषु क्वचन सत्काव्ये सर्वाणि क्वचन सामान्ये च काव्ये कतिपयानि भवन्तीति विवेचनीयम् । एवञ्च प्रकृतखण्डकाव्यस्य रचयिता स्वानुकूलस्य यशसोऽधिगमनाय अर्थस्य करणाय परमानन्दसहोदरानन्दस्याधिगतये च खण्डकाव्यमिदं लिखितवानिति प्रत्येतव्यमत्र ।

३. किं नाम खण्डकाव्यं किञ्च तल्लक्षणम्

खण्डकाव्यपदञ्च समस्तम् । अत्र खण्डपदं खण्डितार्थे लाक्षणिकम् । एवञ्च खण्डमेव काव्यमिति विग्रहे कर्मधारयसमासोऽत्र बोध्यः । नायकस्य नायिकाया वा सर्वाङ्गावर्णकं सर्वचरित्रावर्णकं सर्वरसादीनामवर्णकं काव्यमित्यर्थो वास्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पदस्य। खण्डयुतं काव्यमिति विग्रहे शाकपार्थिवादिसमासो वात्र बोध्यः शाकपार्थिव-देवब्राह्मणादिवत्। काव्यस्य सम्पूर्णानि लक्षणानि यत्र नहि सङ्घटन्ते स्वल्पान्येव काव्यलक्षणानि घटन्ते काव्यवत् प्रतीयमानञ्च तत् खण्डकाव्यं भवति। संस्कृते कालिदासस्य मेघदूतर्तुसंहारौ नेपाल्याञ्च मुनामदननामकं खण्डकाव्यं खण्डकाव्यानि भवन्ति।

खण्डकाव्यं सर्वप्रथमं विश्वनाथेन लक्षणविषयीकृतम्। यद्यपि षष्ठशताब्दीजातानां भामह-दण्डि-वामन-मम्मटानन्दवर्धनानामपि एतत्परिचायने भूमिका आसीदेव तथापि तल्लक्षणकरणपूर्वकव्याख्यानं विश्वनाथस्य वैशिष्टचम्। तेन खण्डकाव्यमेवं लक्ष्यते- 'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च' इति साहित्यदर्पणे। खण्डकाव्ये चात्र एकसर्गतः सप्तसर्गपर्यन्तं सर्गा व्यवस्थापयितुं शक्यन्ते। रुद्रटमते खण्डकाव्यं लघुकाव्यं भवति। अत्र नवरसेषु कस्याप्येकस्य रसस्य प्राधान्यं भवति अन्ये रसाश्चाङ्गानि भवन्ति। संस्कृते खण्डकाव्यस्य बीजानि उषःसूक्तादौ उपनिषत्सु महाभारते पुराणादौ बौद्धवाङ्मये चोपलब्धुं शक्यन्ते।

४. प्राचीनसंस्कृतखण्डकाव्यानां स्वल्पमुदाहरणम्

प्राचीने आधुनिके च काले संस्कृतभाषायामनेकानि नाटकानि महाकाव्यानि काव्यानि खण्डकाव्यानि च विलिखितानि प्राप्यन्ते। तेषां कलात्मकता च समुच्चकोटिका अनुभूयते। इदानीं समुपलब्धानि कतिपयानि खण्डकाव्यानि तेषां विवरणानि चेमानि सन्ति-

(क) कालिदासस्य प्रथमशताब्दीकस्य ऋतुसंहार-मेघदूते।
(ख) घटकर्परस्योक्तसमये जातस्य यमकनामकं खण्डकाव्यम्।
(ग) अमरूकस्य महाकवेरष्टमशताब्दीकस्य अमरूकशतकम्।
(घ) नवमशताब्दीजातस्य कस्यचन जैनकवेः पार्श्वाभ्युदयकाव्यम्।
(ङ) एकादशशताब्दीजातस्य विल्हणस्य चौरपञ्चाशिका।
(च) गोवर्धनाचार्यस्य द्वादशशताब्दीकस्य आर्यासप्तशती।
(छ) द्वादशशताब्दीजातस्यैव जयदेवस्य गीतगोविन्दम् इत्यादीनि
न्यूनावरतश्चतुस्त्रिंशत् खण्डकाव्यानि प्राचीनानि इदानीमप्युपलभ्यन्ते।

बहूनि भारतीयैः कविभिर्लिखितानि खण्डकाव्यानि जयदेवस्य गीतगोविन्दमनुहरन्ति। अभिनवगीतगोविन्दं गीतराघवञ्चानुगतानि तान्युक्तानि खण्डकाव्यान्यनुभूयन्ते च। तत्र खण्डकाव्यतत्त्वानि स्तरीयाणि दृश्यन्ते। आधुनिकानि तु सर्वतत्त्वेषु न तादृशानि। प्राचीने खण्डकाव्ये च शास्त्रीयाणां छन्दसामेव प्रयोगो दृश्यते। उक्तेषु खण्डकाव्येषु अनेकत्र मन्दाक्रान्तायाः प्रयोगो दृश्यते। चन्द्रदूताभिधे खण्डकाव्ये मालिन्याः प्रयोगो विलसति। मनोदूताभिधे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डकाव्ये वसन्ततिलका लसति । खण्डकाव्यस्य तत्त्वेष्वेव क्वचन प्रणयतत्त्वं चरमोत्कर्षं चुम्बति । क्वचन च भगवद्भक्तेर्गङ्गालहर्य उद्दामाः प्रतीयन्ते । तेषु च खण्डकाव्येषु भावानां गाम्भीर्यं विविधरसानां परिपाकः, अलङ्कारा वक्रोक्तिजा चमत्कृतिश्च समनुभूयन्ते ।

आधुनिकैर्भारतीयैरपि खण्डकाव्यानि लिखितानि दृश्यन्ते । तेषु च देवीचरितमित्येकं खण्डकाव्यं मया दृग्गोचरीकृतम् । तस्य लेखकः सुरेशशर्मा 'भारद्वाजः' वर्त्तते । स च सिमलाजनपदस्य वास्तव्यः । इदञ्च खण्डकाव्यं २०१२तमेशवीयवत्सरे लिखितमस्ति । देवीचरितमिदं प्रसिद्धाया दुर्गासप्तशत्याश्छायास्वरूपमस्ति । पञ्चसर्गात्मकमिदं खण्डकाव्यम् । अत्रेयं सर्गव्यवस्था वर्त्तते-

प्रथमो महादुर्गाकवचसर्गः - अत्र १तः २१ श्लोकाः सन्ति ।
द्वितीयो महादेव्यर्गलासर्गः - अत्र २२ श्लोकतः ४३ श्लोकाः सन्ति ।
तृतीयो योगमायाप्रसङ्गसर्गः - अत्र ४४ श्लोकतः६४ श्लोकाः सन्ति । चतुर्थो महिषासुरमर्दिनीप्रसङ्गसर्गः - अत्र सर्गे ६५ श्लोकतः ८५ श्लोकाः सन्ति ।
पञ्चमो जगदम्बिकास्तुतिसर्गः - अत्र ८६ श्लोकतः १०७ श्लोकाः सन्ति ।
एवमत्र खण्डकाव्ये मधुरा भक्तिभावपूर्णा श्लोकाः सन्ति स्तरीयाश्च । अत्र खण्डकाव्यस्य तत्त्वानि सन्ति सम्यक्तया विलसितानि । अत्र प्रधानं वीररसो भक्तिरसश्चानुभूयते । अनेका भक्तिगङ्गालहर्य उद्दामाः प्रतीयन्ते ।
अत्र सुरेशशर्मणा नैजं देवीचरितमेवं परिचायितम्-

निशाधिपं चन्द्रमिवोज्वलाभां
हारान्वितां हैमकिरीटयुक्ताम् ।
दिव्यायुधामष्टभुजां सुनेत्रां
नमामि दैत्यान्वयनाशदक्षाम् ॥ इति ।

देव्या अनन्यभक्तोऽयं खण्डकाव्यकर्त्ता तदन्यान् देवान् न जानाति न च विश्वसिति-

विधिं न विष्णुं न शिवं न शेषं विधुं खगेशं न गुहं गणेशम् ।
मृत्युं न मोक्षं नरकं न नाकं जानीमहे केवलमीश्वरीं त्वाम् ॥ इति ॥
अनेन श्लोकेन खण्डकाव्यकर्त्तुरनन्यता दुर्गादेव्यां समनुभूयते ।

५. नेपाले रचितानि कानिचन खण्डकाव्यानि

नेपालेऽनेकानि खण्डकाव्यानि प्राप्यन्ते । पृथ्वीशतकात् पूर्वभवानि नैपालकविद्वद्भिर्लिखितानि स्तरीयाणि च खण्डकाव्यानीमानि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(क) विंशतिशताब्दीकस्य दधिराममरासिनीमहाभागस्य श्रीरामचरितामृतम् ।

(ख) एकविंशतिशताब्दीकस्य टीकारामपन्थिनो मङ्गलग्रह-सुधर्मादयः ।

(ग) एकविंशतिशताब्दीकस्य भरतराजमन्थलीयस्य **शैलबाला-मोतीवृत्त-कृष्णाभिसर्पणा**दीनि खण्डकाव्यानि ।

(घ) गोरखाजनपदस्य गायत्रीगणेशस्य गुरोरपि **महेन्द्रशतकं** नाम खण्डकाव्यमस्ति । नाम्नैवैतत् खण्डकाव्यं राष्ट्रवादिनो राज्ञो महेन्द्रस्य स्तुतिपरकमस्तीति विदितं भवति । अत्र चैकाधिकशतं श्लोकाः सन्ति । अस्य खण्डकाव्यस्य विवरणं गायत्रीगणेशस्मृतिग्रन्थे(२०६२) द्रष्टुं शक्यते ।

(ङ) गोरखाकाफलडाँडाभिजनस्य पूर्णप्रसादब्राह्मणस्य **रामराज्यम्** नाम खण्डकाव्यमपि विचारप्रधानं महत्त्वपूर्णमस्ति । इदं खलु खण्डकाव्यं तत्कालीनेन महेन्द्रसंस्कृत-विश्वविद्यालयेन २०४९तमे वैक्रमाब्दे प्राकाश्यमानीतम् । अत्र च ४५७ श्लोकाः सन्ति अत्रास्माकं राष्ट्रे नेपाले रामराज्यसदृशं सौराज्यं स्यादिति सदिच्छा समभिव्यक्तास्ति ।

(च) प्राध्यापकस्य रामहरिदाहालमहाभागस्य **अमरभारतीगौरवम्**(२०७३) इत्यभिधेयं खण्डकाव्यं सँस्कृतवाङ्मयगौरवप्रवर्धकं विलसति ।

(छ) कास्कीजनपदस्य प्राध्यापकस्य साहित्यशास्त्रविदुषष्टीकारामाधिकारिणः **चन्द्रप्रभा** नामकं खण्डकाव्यं सँस्कृतवाङ्मयं विभूषयति । इदं हि खण्डकाव्यं २०५८विक्रमवत्सरे प्रकाशितं दृश्यते । चन्द्रप्रभा हि पृथ्वीनारायणस्य नेपालराष्ट्रस्यैकीकर्त्तुस्तत्कार्ये प्रशिक्षिका प्रोत्साहिका च ज्येष्ठा विमाता आसीत् । नेपालस्यैकीकरणे अस्या महत्त्वपूर्णं स्थानमस्ति । एकीकरणकार्ये पृथ्वीनारायणस्य कृते तत्र सफलतायै समभिप्रेरणाप्रदानमस्य खण्डकाव्यस्य प्रधानविषयः ।

(ज) डा. लक्ष्मीकान्तपन्थीविदुषः काव्यमालिकायां २०७५वि.सम्वत्सरीयाया-मन्तर्भूतानि पञ्च खण्डकाव्यानि महत्त्वपूर्णानि रसभावमयानि च सन्ति ।

(झ) संस्कृतवाङ्मयस्य दौर्भाग्यात् कतिपयमासेभ्यः पूर्वं स्वर्गतस्य प्राध्यापकस्य वेणीमाधवढकालमहाभागस्य २०५२तमवर्षे प्रकाशितम् **अमरसिंहचरितम्**इतिनामकं खण्डकाव्यमपि सँस्कृतवाङ्मयं विभूषयति । उदारचरितस्यामरसिंहस्य जीवनचरितं जनकल्याणकारिता चात्र विषयवस्तुत्वेन समादृतमस्ति ।

(ञ) प्राध्यापकेन भागवतशर्मणा लिखितं **जागेश्वरचरितम्** पृथ्वीशतकस्य प्रकृतस्य रचयितुर्नवराजकट्टेलविदुषो मातृशतकम् नैपालकसंस्कृतखण्डकाव्यपङ्क्तौ समागच्छन्ति ।

एवञ्च कस्यापि महापुरुषस्य कमपि घटनाविशेषमादाय लिखितं कवितामयं काव्यं खण्डकाव्यं भवति । अत्र प्रायेणैकस्य छन्दसः प्रयोगो भवति ।अथ च खण्डकाव्यं मानवजीवनस्य एकस्यांशस्य कस्या अपि एकस्या घटनाया एकस्य चरित्रविशेषस्य वा चित्रणं कृतं भवति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डकाव्ये प्रमुखपात्रत्वेन स्वीकृतस्य नायकस्य सर्वचरित्रैः कविः खण्डकाव्यकर्त्ता वा न प्रभाव्यते। एवञ्च कवितामहाकाव्ययोर्मध्येऽस्य खण्डकाव्यस्य स्थानं भवति।

६. खण्डकाव्यस्य तत्त्वानीमानि भवन्ति -

संस्कृतसाहित्ये काव्यविवेचनायां बहुशः कवयः काव्यसमीक्षकाः वस्तुनेतृरसानां समीक्षणं विदधन्ति। वस्तुनेतृरसदृष्ट्या काव्यं कीदृशमिति विवेचयन्ति।

(क) वस्तु इति विषयवस्तु आख्यानं वा - विषयवस्तुना आख्यानेन वा विना खण्डकाव्यं न भवति। पृथ्वीशतके च प्रकृते खण्डकाव्ये पृथ्वीवीरता-तद्विवाह-नेपालैकीकरणादिविषया आख्यानीकृताः खण्डकाव्यस्य विषयवस्तुत्वेन गृहीताः सन्ति। अनुभवानामाख्यानात्मकतासम्पादनम् - अनुभूतीनामाख्यानीकरणेन खण्डकाव्ये कलात्मकता समायाति वर्णनात्मकता चावरुध्यते। पृथ्वीशतके पृथ्वीवैशिष्टचस्य देशैकीकरणविषयाणामाख्यानात्मकताविधानं चात्र दृश्यते।

(ख) नेता इति कथनेन पात्राणां तच्चरित्राणाञ्च सञ्चयनम् - आख्यानमूलानि तद्धारकाणि वा पात्राणि तच्चरित्राणि वा भवन्ति। तानि कलापूर्णानि च स्युरिति ध्येयं भवति खण्डकाव्यकर्त्रा। अत्र राज्ञः पृथ्वीनारायणशाहस्य राजकुमार्या इन्द्रकुमार्या सत्पात्रतात्र दृश्यते। भूपतिः राज्ञी चात्र नायकनायिकारूपेणोपस्थितौ स्तः।

(ग) वातावरणम् - अनुकूलस्य परिवेशस्य चयनं वा - परिवेशश्चात्र अनुकूलं स्थानम् अनुकूलः समयोऽनुकूलञ्च वातावरणं भवति। परिवेशेन काव्यं खण्डकाव्यं वा जनप्रत्येतव्यं सम्पाद्यते। तत्र क्षेत्रे वैदेशिकैः क्रियमाणस्य आक्रमणस्य स्वदेशीयस्य प्रत्याक्रमणस्य च जायमानत्वाद् राजकुमारस्य पृथ्वीनारयणस्य विवाहयोग्यत्वाच्च प्रकृतस्य खण्डकाव्यस्यानुकूल - वातवरणत्वम्। गोरखा-नवकोट-मकवानपुर-चन्द्रगिरि-काष्ठमण्डपोत्यका-टिष्टादिभूमयः परिवेशगतस्थलत्वेन विराजन्ते। पृथ्वीनारायणस्य चरित्रस्योद्गायनत्वाद् समकालिकः समयो बोधव्यः।

(घ) निश्चितस्योद्देश्यस्य निर्धारणम् - पौरस्त्ये वाङ्मये धर्मार्थकाममोक्षाः पुरुषार्था मन्यन्ते। मानवजीवने कैरपि रचनात्मकैस्तत्तत्कार्यैः पुरुषार्थाः समर्जनीया भवन्ति। ते च पुरुषार्था धर्मार्थकाममोक्षरूपाः। पुण्यजनकं कार्यं मानवेन कर्त्तव्यमिति पुरुषार्थरूपस्य धर्मस्य तात्पर्यम्। न्याचयेन पथा अर्थः समर्जनीय इत्यर्थरूपस्य पुरुषार्थस्य तात्पर्यम्। अन्याचयेन पथा तु नार्जनीयं धनं तस्य भ्रष्टाचाररूपत्वान्न्यायालयेन दण्डनीयत्वाच्च।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कामश्च सम्भवानामावश्यकानां वस्तूनामिच्छा वैधे पात्रे रतितृप्तिश्च। इच्छासु अपूर्णासु वैराग्याभावाद् वैधेऽपि कलत्रे रतेरभावे सन्तानोत्पत्त्यभावेन संसारस्य गतेर्निरोधापत्तिर्भवतीति कामोऽपि पुरुषार्थः। मोक्षश्च जनिमतामत्यावश्यक एव दुःखजनकस्य संसारयातायातस्य नैरन्तर्यापत्तेः। एवञ्च पुरुषार्थेषु धर्मार्थौ सुखसाधनौ इति तावत्यावश्यकौ। काममोक्षौ च सुखरूपाविति सुखेच्छुकानां मानवानामत्यावश्यकौ। तत्रापि सातिशयं सुखं क्षणिकं वा सुखं कामो भवति,निरतशियसुखञ्च मोक्षो भवति। मोक्षादधिकं सुखं न कुत्रापीति तस्य निरतिशयत्वम्। कामसुखन्तु सातिशयं मोक्षसुखस्य सत्वात् कामसुखेष्वपि तारुण्यादिस्थितौ तरतमादीनां सम्भवात्। एवं पुरुषार्थानां प्राप्तिर्महाकाव्यस्य खण्डकाव्यस्य चोद्देश्यं भवति पौरस्त्यानामस्माकं काव्यजगति।

अस्य च पृथ्वीशतकाभिधस्य खण्डकाव्यस्य धर्मार्थकाममोक्षाः सर्वाणि उद्देश्यानि। दुष्टदमनं सङ्कीर्णतानाशनं निरन्तरं जायमानस्य युद्धस्य समाप्ति र्विपक्षदलनञ्च धर्मः। देशस्यैकीकरणमर्थलाभः। स्वालम्बनविधान-मेकीकृतदेशसम्पादनं राष्ट्रवादः पृथ्वीसन्देशाश्च कामरूपाः पुरुषार्थाः। परावलम्बनात् खण्डीकरणात् पारिवारिक-वैरिकृतयुद्धादेरुन्मुक्तिश्च मोक्षोऽत्र बोध्यः। एवञ्चास्य प्रकृतस्य खण्डकाव्यस्य पुरुषार्थप्राप्तिरुद्देश्यम्। तत्र चेदं फलोन्मुखम्।

(ङ) रसभावालङ्कारादिविधानम्- अस्य तत्त्वविशेषस्य तात्पर्यमस्ति ध्वन्यर्थकतापि काव्ये महाकाव्ये खण्डकाव्ये च स्यादिति। निम्नलिखितेनेन्द्रकुमारीकथनात्मकेन श्लोकद्वयेन सहृदयहृदयवेद्यः कश्चन ध्वनिः समुदेति -

चेतो गच्छति गोरखाजनपदे स्वर्णस्य कूटे नवे
सौन्दर्यं वनवाटिकाहिमनदं ह्याभाति मे मानसे।
छायाऽस्ये तव भूपते प्रियपते चित्ते च मां स्थापय
क्लिन्नाहं निजनेत्रवारिपतनैर्दग्धा च शोकाग्निना ॥६४॥

देवेशं ज्वलनं प्रपूज्य विधिना तान् वै परिक्रम्य च,
सिन्दूरञ्च त्वया प्रसन्नमनसा दत्तं समन्त्रं शुचि।
साक्षीकृत्य जनान् विवाहविधिना तातगृहाच्च्याविता,
को हेतुर्मम नाथ हापनविधौ पत्नीकृताया बत ॥६५॥

अत्र विधिना विवाहिताया गुणशीलवत्या मम(इन्द्रकुमार्याः) निर्हेतुकं हापनं निन्द्यम्, विपक्षिपक्षदलनपूर्वकं नेपालैकीकरणरूपे महति कार्ये बद्धपरिकरस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उदात्त-विचारस्य तव मत्त्यागरूपे कर्मणि प्रवृत्तिश्चात्यन्तम-शोभनीयेति व्यज्यते । एवं भावविधानमपि पृथ्वीशतके प्रकृते खण्डकाव्ये दृश्यते ।

(च) भाषा शैली च - अत्र भाषापदेन माध्यमभाषा संस्कृतभाषा वा गृह्यते संस्कृतखण्डकाव्यस्य प्रकृतत्वात् । सा च सर्वथा शुद्धा आकर्षिका च स्यात् । शैली च यद्यपि शीले भवा भवति- नितान्तं नैजी भवति, विशेषा भवति,सा च गुणोऽपि । सा च नैजी अपि जनाकर्षिका स्यादिति काव्यकर्त्रा समवधेयम् । अत्र खण्डकाव्य-कर्त्तुर्नैजी एव शैली वर्त्तते । सा इतोऽपि परिष्करणीयतां भजते इत्यन्यत् । अत्र प्रयुक्ता भाषा चेतोऽपि चमत्कृतिलसिता चेत् खण्डकाव्यमिदमितोऽपि समाकर्षकं स्यादिति विभावयामि ।

जयतु संस्कृतमिति संस्थायामन्यतमा उपसमितिर्वर्त्तते प्रकाशनसमितिः । अस्या लक्ष्यमस्ति बहूनि प्रकाशनानि स्तरीयाणि प्रामाणिकानि जनाकर्षकाणि च स्युरिति । तल्लक्ष्यपूर्त्तये स्वयं काव्य-खण्डकाव्य-नाटक-समालोचनादिलेखनैः सक्रियाः सन्तोऽन्यान् विदुषश्च तत्र कार्ये प्रेरयन्तो निजप्रकाशनलक्ष्यं प्राप्नुवन्तो नवराजमहाभागाः सन्ति । अनेन सत्प्रयासेन प्रकृतायाः प्रकाशनसमितेर्लक्ष्याणि पूर्त्तिं गच्छन्ति सन्तीति प्रमोदस्य विषयः । प्रकाशनसमितिसम्बद्धोऽहं तस्य कार्यस्य कृते धन्यवादान् व्याहरन् प्रकृतं पृथ्वीशतकं जनमोदकं भूयात्, कट्टेलमहाभागाश्च विविधान्यकृतिलेखने सक्रियाः स्युरित्याशासानो विरमामि ।
जयतु संस्कृतम्

कलङ्की, काष्ठमण्डपः,
दीपावली २०८१ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वीशतकमितिखण्डकाव्यस्यानुशीलनम्

प्रा.रामहरिदाहालः

खण्डकाव्यमिति खण्डं खण्डितं च तत् काव्यं कवि कर्मेति व्युत्पत्या खण्डकाव्यं नाम काव्यिकविषयवस्तुन एकदेशीय चर्चासम्बलितं काव्यं बोद्धव्यं भवति। दण्डि-रुद्रट-विश्वनाथाः खण्डकाव्यसमबन्धे एवमेव परिभाषन्ते- खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि चेत्यादिवाग्भिः। उत्कृष्टकवितायुक्तं सदपि लघ्वाख्यानात्मकं जीवनस्यैकक्षेत्रस्य वर्णनप्रधानं मध्यमाकारकाव्यं खण्डकाव्यं मन्तव्यं भवति।

महाकाव्यं महाकवेः परिचायकं प्रतिभायाम्, आकारे च महच्च तत् काव्यं समस्त -व्युत्पत्या प्रतिपादितमेवैतत्। एतन्नाल्पं बुद्ध्या नाल्पप्रतिभाव्युत्पत्त्यभ्यासैः प्रवेष्टुं शक्यम्। तत्रापि रसमयकाव्यनिर्माणं न विदुषामपि वशे। विद्वत्स्वपि बहुशास्त्रविदो रसिका बहुप्रतिभावन्तः शास्त्रालोडन-देशान्तरभ्रमण-जनसम्पर्कप्रभृति-माध्यमार्जित-व्युत्पत्तिमन्त एव कदाचिन्-महाकाव्य-निर्माणाय कल्पन्ते। अत एव कालिदासभारव्यादयो रससिद्धाः महाकवयोऽङ्गुलिगणनमिता एव प्राप्यन्ते।

खण्डकाव्यं न तथा। न तथेत्यनेन नाल्पज्ञानेन, नाल्पव्युत्पत्या चेदमपि निर्मितं न भविष्यति । निर्मितेऽपि विद्वज्जनप्रियं तत्रापि कविप्रियं न भवति। अत्रापि शक्तिव्युत्पत्त्यभ्यासानामावश्यकताऽस्ति नितराम्। खण्डकाव्यमेवेति कथनेन न खण्डकाव्यस्य मूल्यवत्त्वं सिद्ध्यति। काव्यिकविषयवस्तुनः एकदेशीय चर्चादिसत्यामपि रसमयतायां, व्युत्पत्तौ, प्रतिभाप्रकाशने च खण्डकाव्येन नैन्यून्येन न भाव्यम्। अत एव कालिदासस्य मेघदूतं त्रयाणां प्रतिभाव्युत्पत्त्यभ्यासानां प्रतिस्पर्धितया सत्त्वात् महाकाव्यवत् कविसमाजसमादृतमस्त्येव। 'मेघे माघे गतं वयः' इति भणितिः सुतरामाकर्षयति भावकान्।

एवञ्च पण्डितराजजगन्नाथस्य सुधालहरी, अमृतलहरी, लक्ष्मीलहरी, करुणालहरी, गङ्गालहरी चेति पञ्चलहर्यः, भर्तृहरेः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नीतशृङ्गारवैराग्यशतकत्रयम्, महाकवेर्बाणस्य चण्डीशतकम्, शिवशतकञ्च, महाकवेर्जयदेवस्य गीतगोविन्दम्, अमरुककवेः अमरुशतकम्, मयूरकवेः सूर्यशतकम्, नीलकण्ठदीक्षितस्य शिवोत्कर्षमञ्जरी, बिल्वमङ्गलस्य कृष्णकर्णामृतञ्चेत्यादीनि खण्डकाव्यानि महाकाव्यवदादरभाज्जि वर्तन्ते काव्यजगति । अतः खण्डकाव्यस्यापि अस्त्यस्तित्वमिति विभावनीयं पाठकैः । यद्यपि खण्डकाव्यसम्बन्धे समीक्षकैर्महाकाव्यवद् विवेचितं नास्ति । महाकाव्यस्य विशेषतायां रसमाणाः समीक्षकाः खण्डकाव्यसम्बन्धे विशेषेण प्रभाविता न दृश्यन्ते विहाय मेघदूतादिकं कतिचित् खण्डकाव्यम् । साहित्यदर्पणकारकृता खण्डकाव्यस्योदाहरणे मेघदूतमित्युल्लिखितम् । संस्कृतसाहित्ये मेघदूतसदृशमुत्कृष्टं खण्डकाव्यं नास्ति । संस्कृतसाहित्ये एकश्लोकीयरचनामुक्तकरूपेण यद्वा निर्बन्धकाव्ये प्रत्येकं श्लोकाः पूर्णा भवन्ति, निरपेक्षाश्च भवन्ति । अत एव ते मुक्तकाव्यशब्देन परिभाषिताः । स्वतन्त्राः काव्यिकरचनाः ।

एकश्लोकात्मकम् - मुक्तकाव्यम्
श्लोकद्वयात्मकम् - युग्मकम्
श्लोकत्रयात्मकम् - सन्दानतिकम्
चतुश्श्लोकात्मकम् - कलापकम्
पञ्चश्लोकात्मकम् - कुलकम्
(साहित्यदर्पणः षष्ठः परिच्छेदः ३१४ कारिका)

ततः परं प्रबन्धकाव्यं खण्डकाव्यं वा मन्यते संस्कृतसाहित्यपरम्परायाम् । खण्डकाव्यं छन्दोबन्धात्मकं श्रव्यकाव्यम् । कतिचन बहुश्लोकात्मकानि स्तोत्रकाव्यानि गीतिकाव्यान्यपि खण्डकाव्यन्तर्गतानि मन्तव्यानि । संस्कृते नेपालिभाषायामपि ।

प्रकृते पृथ्वीशतकमिति एकमैतिहासिकखण्डकाव्यं वर्तते । पृथ्वीशतकमिति पदेनैव बुद्ध्यते, इदं भूपतिपृथ्वीनारायण-शाहविषयकं खण्डकाव्यमिति । राष्ट्रनिर्मातुः पृथ्वीनारायणं को न नेपाली जानाति यः पूर्वपश्चिमभागयोः 'बाइसे' 'चौबिसे' नाम्ना विभक्तान् नैपालकभूभागान् एकीकर्तुं प्रायतत । तत्र बहुधा सफला चार्जिता । विक्रमवत्सरस्य अष्टादशशतकस्यान्तिमसमये नेपाले पञ्चाशतोऽप्यधिकानि राज्यानि स्थितान्यासन्, तान्यपि परस्परविरोधीनि, विलासप्रियाणि च । अस्यां स्थितौ यदि नेपाल एकीकृतो न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भविष्यति तर्हि आङ्ग्लपक्षतश्चीनपक्षतो वोभयपक्षतः कबलीकृतो भविष्यतीति दूरदृष्टिवता वृद्ध(बडा)महाराजेन नेपालमेकीकृत्य सुदृढं राज्यं निर्मातुं भगीरथशपथेन सह भगीरथप्रयाशश्चाविश्रान्तं विहितः। पितुर्नरभूपालशाहस्य नुवाकोटविजप्रयासस्य असफलतायाम्, उपत्यकाया राज्यत्रयस्य पारस्परिकयुद्धं, कलहः, भ्रातृविताडनानि, लमजुङ-तनहुँमण्डलाभ्यां मुर्हुमुहुर्विहितं गोरखाविजयस्य प्रयासम्, भारतस्थैराङ्ग्लैर्भूयोभूयो विधीयमानानि राज्याक्रमाणानि च निभालयता पृथ्वीनारायणेन राज्यारोहणस्यानुपदमेव नुवाकोटविजयाय प्रयासश्चालितः।

प्रथमवारस्य युद्धे कथं पराजिता वयमिति विचार्य काशीं प्रस्थाय ततः शस्त्रास्त्राणि क्रीत्वा योजनाबद्धरूपेण नुवाकोटमाक्राम्य विजयोऽधिगतः पृथ्वीनारायणेन। तदनु क्रमशः पर्वतीयप्रदेशान् विजयं कृत्वा य कतिचिद्वर्षावधावेव काष्ठमण्डपोपत्यकायास्त्रीणि राज्यानि च वशीकृतानि। एवं मकवानपुरप्रभृतीनि कतिचित् पूर्ववर्तिराज्यानि लमजुङप्रभृतीनि पश्चिमवर्तिराज्यानि च विजितानि।

अस्य एकीकरणाभियानं रणबहादुरशाहस्य समये बहादुरशाहेन सेनापतिना अमरसिंहेन च प्रपूर्य पूर्वभागे टिष्टापर्यन्तं पश्चिमे च काङ्गणापर्यन्तं चन्द्रसूर्याङ्किता नेपालपताका पवनान्दोलिताऽऽसीत्। सुगौलीसंविदानन्तरं नेपालस्य एकतृतीयांसो भूभागश्छिन्नोऽभवत्। तथात्वेऽपि पूर्वमेचीतः पश्चिममहाकालीपर्यन्तं यादृशो विशालो नेपालोऽधुना वेविद्यते तस्य मुख्यं श्रेयः पृथ्वीनारायणशाहस्योपरि गच्छति। अतोऽसौ राष्ट्रनिर्माता।

श्री ५ पृथ्वीनारायणस्य सम्बन्धे शक्तिवल्लभ-ललितावल्लभप्रभृतिभिः प्राच्यविद्वद्भिः अन्यैः आधुनिकविद्वद्भिश्च बहूनि काव्यानि महत्काव्यानि नाटकान्यपि नेपाल्यां संस्कृते च लिखितानि प्राप्यन्ते। अधुना खण्डकाव्यमानीय प्रा.डा. नवराजकट्टेलः संस्कृतसाहित्ये उदीयमानो दृश्यते नेपालभुवि।

अस्मिन् खण्डकाव्ये काव्यकर्त्रा एकादशशीर्षकाणि विन्यस्तानि यत्र गोरक्षदेशस्य सौन्दर्यमाद्यम्, पृथ्वीनारायणस्य जन्मसंस्कारश्चेति द्वितीयम्, विवाह-काष्मण्डपागमन-मितिहासबोध-राज्याभिषेक-प्रयाण-नवकोटविजय-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चौदण्डी-राज्यविजयेन्द्रकुमारीपत्र-पृथ्वीनारायणोत्तर-पृथ्वीनारयण-प्रशस्ति-तदीयसन्देशाश्च क्रमशोऽन्यानि कविताशीर्षकाणि यानि सर्वथा सामयिकानि सन्ति। कवनीये विषये एव काव्यकारेण काव्यं कृतम्। स्वजन्मभूमेः राष्ट्रनिमातुश्च श्रद्धायाः कारणात् तीव्रराष्ट्रियचेतनायाः कारणात् अधुनातनयुवसु राष्ट्रप्रेम्णो जागरणस्योद्देश्येन नेपालस्य पर्वतीयसौन्दर्यप्रस्फोटनस्योद्देश्येन नेपालिषु सर्वेष्वपि उत्साहसञ्चारणस्योद्देश्येन एतदस्माकं स्वत्वं स्वगौरवं, यच्चान्यदेशानामपेक्षया न न्यूनमपि न त्वधिकमेवेति प्रदर्शनस्योद्देश्येन, कविताकवने ऽहमपि किञ्चिदस्मीति प्रदर्शनस्योद्देश्येन वा काव्यमिदं लिखितं भवेदिति तर्क्यते।

काव्यस्य विशिष्टपक्षाः

१. माधुर्यप्रसादयोः समन्वयः

आसीज् ज्योत्स्ना धवलशिखरे ह्युत्तरस्यां दिशायां
हास्यं तन्वन् मुदितमनसा चान्नपूर्णो गणेशः ॥
गायं गायं कलकलरवैर्नृत्यती सा त्रिशूली
धावं धावं सरलगतिका चम्पया सार्द्धमेति ॥

उत्तरदिशि शुभ्रशिखरऽन्नपूर्णो हिमाद्रिरास्ते। एतस्य श्वैत्यमालक्ष्य कविः स्वसौन्दर्येण मुदितमना असौ हिमालयः हसति किम्विति। एवं द्वितीयपद्ये कलकलरवैर्हिमालयादधोऽधो धावन्ती त्रिशूली कलकलं शब्दमाध्यमाः ननु गायतीति उत्प्रेक्षाध्वनिः, इव यथा मन्ये शङ्के ध्रुवमित्युत्प्रेक्षा-वाचकशब्दविरहात्।

उद्याने ते कुसुमलसिते पुष्पगुच्छा जहास
वध्वा साकं कुसुमशिखराः स्पर्धमाना बभूवुः।
पुत्र्युद्वाहे रसिककुसुमाः नृत्यमाना बभूवुः
हैमी भूमिः सुमधुररसे नृत्यगाने न्यमज्जत् ॥२१॥

कुसुमावलिभिश्शोभिते उद्याने पुष्पगुच्छो जहास मां जेतुं सौन्दर्येऽन्ये न

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रभवन्तीति धियेति अत्राप्युत्प्रेक्षाध्वनिः। कुसुमरूपा गिरयोऽपि वध्वाः पुष्पलतारूपवध्वा साकं वयमपि रूपे न्यूना न स्म इति स्पर्द्धमाना इव दृश्यन्ते इत्यत्रापि उत्प्रेक्षैव ध्वन्यते। हेमकर्णतनयायाः विवाहे कुसुमरूपा युवकाः पवनान्दोलिताः सन्तो नृत्यन्ति किमु ! पवनान्दोलने कुसुमानामितस्ततो नृत्याङ्गना इव सञ्चलनं दृश्यत एव। तत्रत्याभिर्युवयुवतिभिर्विहिते नृत्यमाने श्रुत्वा तत्रत्या भूमिर्वा नेपालावनिरपि नृत्यमानयोर्निमग्नास्तीति किमु ! इत्युत्प्रेक्षैव ध्वन्यतेऽत्रापि पद्ये। अत्र नेपालावनेर्विशिष्ट-सौन्दर्यप्रदर्शनाद् भावः रतिर्देवादिविषया भाव इति सिद्धान्तात्। भावस्याङ्गता उत्प्रेक्षेति। अत्र प्राकृतिकः शृङ्गारश्चेति।

वीररसप्रयोगकौशलम्

भटाश्च गोरखा रणाय ते गता कृपाणकाः
नु पर्वताच्च पर्वतात् नु गण्डकीं विहाय ते।
त्रिशूलगण्डकीं सुघोरनादकीं स मर्दयन्
जलप्रवाहताडनैर्निशापतिं च कोपयन् ॥४१॥

निशाचरा रणे नु क्रीडका रणे नु जीविता
त्सरुप्रियाः सशूलकाः सबाणकाः सखड्गकाः।
सुकौशला रणे च नर्तने कालभैरवा
भटाश्च गोरखा रणाय ते गताः कृपाणकाः ॥४२॥

उभयत्रैव पद्ययोर्वीररसः प्रकाशतेतराम्। पूर्वत्र रणाय प्रस्थिता गोरखीयसैनिकाः कृपाणयुक्ताः सन्ति। त्रिशूलीं तीर्त्वा पर्वतात् पर्वतमिति कृत्वा घोरनादिनीं त्रिशूलीगण्डकीमपि हस्तैश्शताडयन्ताः -किञ्चिन्न गणयन्तः) युद्धार्थं प्रस्थिता इति। उत्साहस्थायिभावस्योत्कर्षादत्र वीररसो जृम्भतेतराम्। द्विचत्वारिंशत्तमे पद्ये गोरखादेशीयाः सैनिका निशायामपि युद्धव्यसज्जा भवन्तीति इमे निशाचराः किम् ! शूलबाणखड्गयुक्ता युद्धकुशला इमे कृपाणधारिणः कालभैरवा एव सन्ति किमु ! अत्र रूपकम्, गोरखवीराः कालभैरवा एव भैरवत्वे तेषामारोपणात्। भैरवः स्वयमपि भीषणो भवति, तत्रापि कालरूपेणोपस्थितश्चेत् कति भयदः स्यात् ? कविताः प्रायः उत्साहवर्धकाः सन्तीति वीररसस्योद्दीपनाय क्षमाः। स्वाभाविकमपि प्रकृतकाव्ये राष्ट्रनिर्मातुः शौर्यगाथागायने।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इन्द्रकुमारीपृथ्वीनारायणशाहयोः पत्रव्यवहारादपि पाठकमनः आन्दोलितं भवति। वीरांगनायाः वीरपुरुषेण सह सम्बधः सुघटते।एवंविधं पत्रं रुक्मिण्यापि श्रीकृष्णाय प्रेषितमासीत्। यथा -

का त्वां मुकुन्द महती कुलशीलरूप-
विद्यावयोद्रविणधामभिरामतुल्यम्॥
धीराम्पतिं कुलवती न वृणीत कन्या
काले नृसिंहनरलोकमनोऽभिरामाम्॥
(श्रीमद्भागवतः १० स्कन्धः ५२ अध्यायः)
अत्र इन्द्रकुमारी पृथिवीनारायणाभावे चेखिद्यते वक्ति च

राजन्! हे क्षितिपाल! मां प्रणय हे चैकान्ततो हर्म्यतः
त्यक्त्वा गच्छसि दूरदेशविपिने मूर्छाङ्गताहं प्रिया।
प्रासादे जनसंकुले जनयुते कोलाहले सद्मनि
नैर्जन्यं ह्यनुभूयते प्रतिदिनं पत्युर्वियोगेन वै॥ ६३॥

भो प्रियतम! मां पूर्वप्रणये वध्वा पर्यणत् कथं त्यजसि प्रासादे स्थितास्मि, जनाः सेवयन्ति च परं पत्युर्वियोगेन नैर्जन्यमनुभूयते मयेति चिन्ताया विषयः भावध्वनिः। आदौ मध्येऽन्ते चेति कृत्वा काव्ये वीररसः एव राजते प्रधानतया। शृङ्गारादिषु कादाचित्केन सत्त्वापि ते प्रधानरसस्य वीरस्यैवाङ्गभूताः इति युक्तमेवैतत्। काव्ये नायकः पृथ्वीनारायणो महावीरः नायिका इन्द्रकुमारी, नेपालावनिश्च। नायकनायिके ऽवलम्ब्यकाव्यनिर्माणा-दालंम्बनविभावोऽत्र। ·आलम्बनं नायकादिर्यमालम्ब्य रसोद्गमादिति साहित्यसरणिः। प्रतिपक्षिणो बाइसेचौबिसे राजानः तेषु भयस्य सत्त्वात्। बाणकृपाणसञ्चालन-सिंहनादप्रभृतयः उद्दीपनविभावाः। हस्तचालनमुष्टि-बद्धता-ओष्ठदंशनाट्टाहासादयोऽनुभावाः। आवेगवद् विबोध-गर्वामर्षौत्सुक्योन्मादस्मृतिमतिहर्षादयो व्यभिचारिभावाश्चेति सर्वथा वीररसप्रधानं काव्यमेतत्।

संस्कृतसाहित्ये वीररससम्बलित-खण्डकाव्यप्रणयनमाध्यमेन प्रा.डा. नवराजकट्टेलमहाभागेन महान् योगः प्रापितः इति प्रमोदावहोऽयं विषयः। खण्डकाव्यप्रकाशनेन जयतु संस्कृतमिति संस्था च धन्या गर्विता चास्ते।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपालवासिनः संस्कृताध्येतारश्च गर्विताः सन्ति ।

अस्य काव्यस्याध्ययनेन लोके जागृतिर्वर्धिष्यते, स्वदेशवर्धनाय जनाः प्रयतेरन् पूर्वपुरुषाणां महाबलिदानात् प्राप्तां नेपालधारामग्रे वर्धयिष्यन्ते । वृत्तये विदेशपलायनं अवरुध्य वृद्ध(बडा)महाराजप्रभृतिभिरर्जितं वर्धितञ्च नेपालराष्ट्रं वयमपि कर्मणा त्यागेन च वर्धयिष्याम इति विचार्य जना नेपालावनेर्विकासाय संलग्ना भविष्यन्तीति विचार्य विश्वस्य च काव्यनिर्माणे स्वयं जागरुको भूत्वाऽन्येषां जागरणाय च सततं यतमानं प्रा.डा. नवराजकट्टेलमहाभागं भूरिशः साधुवादानुदीर्य एतस्योत्तरप्रगतिं कामयमानो विरमामीति शम् ।

विदुषां वशम्वदः
प्रा. रामहरिदाहालः
कलङ्की, काष्ठमण्डपः
दिनाङ्कः २०८१। ६।१०।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काव्यकारस्योपोद्घातम्

१. प्राक्कथनम्

इदं मम द्वितीयं खण्डकाव्यम् । प्रथमखण्डकाव्यं मया मातुः निधने दशगात्रविधौ एव दशदिनाभ्यन्तरे मातृशतकं शोककाव्यमिति रचितमासीत् । मम माता २०७१ चैत्रमासस्य २०दिनाङ्के रात्रौ दिवङ्गतासीत् । तत्खण्डकाव्यं मया राष्ट्रकविं माधवघिमिरेवरं श्रावितञ्चाासीत् । मम काव्यं श्रुत्वा तेन विदुषा काव्यरचनायां विमर्शश्च दत्तः, तदनुसारं मयां परिष्कृतञ्च तदनु स शुभकामनाञ्च दत्तवान् । कोभिड-१९ कोलाहलसमये सर्वे मनुष्या गृहे एव पिनद्धाः, तदवसरे मया रूपकाणि लिखितानि, कविताः रचिताः, अनेके लेखाः विरचिताः । एवञ्च 'नेपालमा संस्कृत शिक्षा' इति अनुसन्धानमूलकं १००० पृष्टात्मकं ग्रन्थञ्च अलिखम् । २७ संख्यकानि रूपकाणि च लिखितानि । तेषां मध्ये एकविंशतिः लघुनाटकानि प्रकाशितानि । एतस्मिन्नेव क्रमे पृथ्वीशतकमिति खण्डकाव्यमपि विरचितम् । कोभिडत्रासविनाशपश्चत् विश्वविद्यालयस्य अनेकेषु कार्येषु व्यस्तो जातः । अतः परिष्करणस्य प्रकाशनस्य च अवसरो नागतः । अधुना अवकाशजीवने ग्रन्थप्रकाशने सन्नद्धोऽहम् ।

ऋग्वेदसमयादेव ऋषयः, कवयः, स्रष्टारः कवितासर्जने सन्नद्धा दरीदृश्यन्ते । वैदिकसाहित्ये उत्तरवैदिकसाहित्ये च कविता रचिताः सन्ति । तदनन्तरं काव्यानि, खण्डकाव्यानि, महाकाव्यानि, नाटकानि, चम्पूकाव्यानि च लिखितानि प्राप्यन्ते । महर्षिणा भरतेन नाट्यशास्त्रे नाटकस्य विवेचनाक्रमे विविधविषयाश्च उत्थापिताः । अतः संस्कृतवाङ्मये नाट्यशास्त्रं प्रथमो समीक्षाग्रन्थः, लक्षणग्रन्थो वा । तदनन्तरं भामहस्य काव्यालङ्कारः, तदनु मम्मटस्य काव्यप्रकाशः, दण्डिनः काव्यादर्शः, विश्वनाथस्य साहित्यप्रकाशः इत्यादयो ग्रन्थाः लक्षणग्रन्थेषु समुपलभ्यन्ते । एतेषु ग्रन्थेषु कविता, खण्डकाव्यं, महाकाव्यं, नाटकं, चम्पूकाव्यं च कथं भवति, एतेषां लक्षणविषये, रसध्वन्यलङ्कारेषु च विवेचनं प्राप्यते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

१. कविता

कविता कविशब्दान्निर्मीयते । कविशब्दः 'कुङ् शब्दे' वा कव् वर्णने गतौ (कवृ वर्णे) धातोः निष्पद्यते । कुङ् शब्दे धातोः इ-प्रत्ययेन ('अचः इः' सूत्रेण इप्रत्यये, गुणे, अवादेशे च) कविशब्दः उत्पद्यते । कव् (शब्दे) धातौ च इन्-प्रत्ययत्वेन कविशब्दो जायते । शब्दकल्पद्रुमकारस्तु 'कवते श्लोकान् ग्रथते वर्णयति वा' इत्यर्थे कविशब्दस्य व्युत्पादनप्रक्रियां दर्शयति । अन्यच्च 'कवते सर्वं जानाति सर्वं वर्णयति, सर्वं सर्वतो गच्छति वा' इत्यर्थे च कविशब्दः व्युत्पाद्यते । अपरञ्च 'कौति शब्दायते विमृशति रसभावानिति कविः' इति व्युत्पत्तिश्च लभ्यते । राजशेखरः 'कवृवर्णधातोः कविशब्दस्य व्युत्पत्तिं दर्शयति (काव्यमीमांसा-३)[१] । परन्तु कवृ इत्यत्र बकारो विद्यते । राजशेखरस्य मतं स्वीकृयते चेत् तत्र 'कवृ'इत्यपि स्वीकर्तव्यं भवति । कविशब्दस्य प्रयोगो वेदे च लभ्यते । शुक्लयजुर्वेदस्य ४० अध्याये च कविशब्दो दृश्यते । संहितायां, ब्राह्मणग्रन्थे उपनिषत्सु च कविशब्दस्य प्रयोगो विलोक्यते । कविशब्दादेव 'तल्' प्रत्ययेन कविताशब्दो जायते । एवञ्च भावे कर्मणि च 'ष्यञ्' प्रत्ययेन काव्यशब्दो जायते । कविकर्म कविधर्मः इत्यर्थोऽपि काव्यशब्दस्य दृश्यते । उत्तरवैदिकसाहित्ये च कविशब्दस्य प्रयोगो बहुधा प्राप्यते । विश्वसृष्टिकर्तारं, काव्यकरञ्च कविशब्देन बोध्यते । यथा ध्वन्यालोके

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथा विपरिवर्तते ॥

(ध्वन्यालोकः पृ.४२२) ।

भरतमुनिः (ईशवीयस्य प्रथमशतकः) नाट्यसिद्धान्तस्य प्रथमः आचार्यः । भामहः(षष्ठः शतकः) काव्यसिद्धान्तस्य प्रथमः आचार्यः । तस्य 'शब्दार्थौ सहितौ काव्यम्' (काव्यालंकारः १।१६) परिभाषास्ति । शब्दार्थयोः सहभावः एव काव्यमित्यस्य भावो व्यज्यते । वास्तविकार्थे लोकोत्तरवर्णननिपुणः कविकर्म एव काव्यम् । भामहपश्चात् दण्डिकाव्यपरिभाषाविषये विमर्शमकरोत् ।

[१] कविशब्दश्च 'कवृवर्ण' इत्यस्य धातोः काव्यकर्मणो रूपम् (सा.द.२। ३।) ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इष्टार्थयुक्ता पदावली एव काव्यस्य शरीरम् ('शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली (काव्यादर्शः, १।१०) इति निगदितवान् ।

तदनु आचार्यो वामनः काव्यस्य रीतिरात्मेति परिभाषां करोति यथा - 'रीतिरात्मा काव्यस्य' (काव्यालङ्कारसूत्रवृत्तिः ११।१।१,२,३)। रीतिशब्देन शैली इत्यर्थोऽवगम्यते। एवं, शैली काव्यस्य निर्माण-निर्मितिप्रक्रियायां सम्बद्धोऽस्ति अतः शैली काव्यात्मा भवितुं नार्हति, अपितु शरीरमिति गम्यते। अलङ्कारत्वात् काव्यं ग्राह्यं भवति । काव्यसौन्दर्यमेवालङ्कारः। दोषाणां परिहारेण गुणालङ्कारयोः ग्रहणेन काव्ये सौन्दर्यं समुत्पद्यते। वामनस्य विचारे शब्दे अर्थे च काव्यत्वं जायते, तत्र गुणानामलङ्काराणाञ्च संयोजनं भवितव्यमिति तस्याशयः (काव्यालङ्कारसूत्रवृत्तिः ११।१।१,२,३)[२] ।

अष्ठमशतकस्य रुद्रटः वामनस्यैव समकालिकः । आचार्योऽयं न नवीनं काव्यपरिभाषावचनं वक्ति, अपितु भामहमार्गमवलम्बते यथा 'शब्दार्थशरीरं तावत्काव्यम्' (काव्यालंकारः ३।१) ।

नवमशतकस्य आनन्दवर्द्धनः ध्वनिवादिसिद्धान्तस्याचार्यः। अयमाचार्यः ध्वनिरेव काव्यस्यात्मेति मनुते। शब्दार्थौ काव्यस्य शरीरं, ध्वनिः काव्यस्यात्मेति अस्य चिन्तनं दृश्यते। खल्वयं 'ध्वनिरात्मा काव्यस्य' इति वक्ति। अयमाचार्यः सामान्यचिन्तने सीमितं ध्वनिचिन्तनं साहित्यस्य गहनतमसिद्धान्तस्य भूमिकायां प्रतिष्ठां दत्तवान् ।

एकादशशतके दृश्यमानः आचार्यः कुन्तको वक्रोक्तिसिद्धान्तस्य प्रथमाचार्यः। अतः इमे विद्वांसः वक्रोक्तिरेव काव्यस्य आत्मेति मन्वते (वक्रोक्तिः काव्यजीवितम्)। कुन्तकश्च अलङ्कारं काव्यस्य आवश्यकगुण इति मनुते। स चायं काव्यस्य विनोदप्रियेषु कवेश्चमत्कारपूर्णे सुसङ्गठितरचनाविशेषे व्यक्तं आनन्ददायकः सुव्यवस्थितः शब्दः अर्थश्च संयुक्तरूपेण काव्यमिति (वक्रोक्तिकाव्यजीवितम् १।७) [३]वर्णयति। भामहोऽपि 'शब्दार्थौ सहितौ' शब्दः

---

[२] (क)काव्यं ग्राह्यमलङ्कारात् सौन्दर्यमलङ्कारः। स दोषगुणालङ्कारहानादानाभ्याम् ।
(ख) काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।

[३] शब्दार्थौ सहितौ वक्र-कवि-व्यापारशालिनी ।
बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणी ॥(वक्रोक्तिजीवितम्, १।७)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रयुङ्क्ते, परन्तु कुन्तकः काव्यरचनायां कवेः भूमिकां महत्तां च सातिसयं स्थापयति ।

एकादशशतकस्य भोजराजः 'दोषरहितं, गुणसहितं, सालङ्कारं रसमयं काव्यं रचयित्वा कविः कीर्तिं लोकप्रियतां च प्राप्नोतीति प्रणिगदति (सरस्वती-कण्ठाभरणम् १।२)[४]।

द्वादशशतकस्य मम्मटः संस्कृतसाहित्ये प्रसिद्धः आचार्यः । स दोषरहितं गुणसहितं शब्दार्थं काव्यमिति निगदति। अत्र अलङ्कारत्वे सति काव्यं, कुत्रचित् अलङ्काराभावेऽपि काव्यत्वे न हानिरिति विवेचनं विहितम् (काव्यप्रकाशः १।४)[५]।

वाग्भटस्य परिभाषा अव्याप्तिरतिव्याप्तिदोषरहिता दृश्यते। तेन पूर्ववर्तिनः आचार्याणामपि विचारं सङ्कलय्य तेषु मन्थनं विधाय परिभाषा दत्ता । तदनुसारं गुणालङ्काररीतिरसयुक्तः सुन्दरशब्दार्थसमूहः एव काव्यम् (वाग्भटालंकार पृ.१४)[६] ।

चतुर्दशशतकस्य आचार्यः विश्वनाथः वाक्यं रसात्मकं काव्यमिति परिभाषां करोति। काव्येन दोषरहितेन भवितव्यं, यदि दोषयुक्तं स्यात् तदा काव्यत्वे हानिर्भवतीति निर्दिष्टम्। गुणालङ्कार-रीतितत्त्वनि काव्योत्कर्षस्य हेतुभूतानि सन्ति (सा.द.१-३) [७]। विश्वनाथः रसवादी आचार्यः तस्य परिभाषापि तदनुकूलमेव दृश्यते ।

काव्यपरिभाषाकरणे संलग्नोऽन्तिम आचार्यः पण्डितराज-जगन्नाथः सप्तदशकशतकस्याचार्यः। जगन्नाथः शब्दे अर्थे च उभयत्र एव काव्यत्वं प्रतिष्ठते चेति मतमुपस्थापयति। स चायमाचार्यः रमणीयार्थ-प्रतिपादकः शब्द

---

[४] निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम् । रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिञ्च विन्दति । (सरस्वतीकण्ठाभरणम् १।२)

[५] 'तददोषौ शब्दार्थौ सगुणवानलङ्कृती पुनः क्वापि ।' (काव्यप्रकाशः १।४)

[६] गुणालङ्काररीतिरसोपेतः साधुशब्दार्थसन्दर्भः काव्यम् । (वाग्भटालंकार पृ.१४)

[७] वाक्यं रसात्मकं काव्यं दोषस्तस्यापकर्षकाः ।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः ॥ सा.द.१-३।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एव काव्यमिति मनुते (रसगंगाधर पृ.९) [८]। कश्च रमणीयार्थः ? अस्य व्याख्यायां महान् प्रयत्नो विहितः। तदनुसारं लोकोत्तरानन्दः एव रमणीयार्थः इति। लोकोत्तरानन्दानुभूतिकारकतत्त्वम् अथवा लोकोत्तराह्लाद-जनकज्ञानस्य विषयः रमणीयार्थः। लोकोत्तरत्वस्यार्थः भावकस्य मनसि समुत्पन्नोऽनुभवः, साक्षिभावे उद्बुद्धतया तिष्ठन् 'चमत्कारत्वस्य' उत्पादकः, तस्य ज्ञानस्याधारशिला च। लोकोत्तरचमत्कारपूर्णस्य ज्ञानस्य च आधारः पौनः पुन्येनानुसन्धानेन वा भावनानुशीलनेन उत्पन्नो भवति। 'पुत्रस्ते जातः', 'धनं ते दास्यामि' इति वाक्यार्थधीजन्याह्लादस्य न लोकोत्तरत्वम्। अतो न तस्मिन् वाक्ये काव्यत्वप्रसक्तिः (रसगंगाधरः पृ.९-१०, प्रथमम् आननम्)[९]।

पाश्चात्यजगति च अनेके विद्वांसः काव्यपरिभाषां चक्रुः। अकनेकेषु सूरिषु अरस्तुः मूर्धन्यश्चिन्तको दृश्यते। अरस्तुः (ईशवीयपूर्वं तृतीयशतकः) लिखति यत् 'कविता काव्यं वा भाषामाध्यमेन अभिव्यक्ता अनुकरणात्मिका कला' इति। अग्रे च कथयति 'काव्यं कविता वा निश्चितरूपेण छन्दोमयं साहित्यं विद्यते, इदं साहित्यं जीवनं सिर्जनात्मके आख्याने प्रतिविम्बितं करोति' इति। अन्यः काव्यचिन्तकः जोन्सनः 'कविता छन्दोबद्धरचनास्ति' इति वदति चेत् अपरः काव्यचिन्तकः कलरिजः 'सर्वश्रेष्ठपदावल्याः सर्वश्रेष्ठगुम्फनमेव कविता' इति कथयति। अन्यः स्वच्छन्दतावादी चिन्तकः वर्डस्वर्थः 'कविता सशक्तायाः अनुभूतेः निरवछिन्ना उच्छ्वलतास्ति, इयं शान्तक्षणे पुनः स्मृतेः संवेगाज्जायते' इति कथितवान्। अपरः सेली 'कविता सामान्यतया कल्पनायाः अभिव्यक्तिरस्ति' इति गदति।

नेपालिसाहित्यस्य तेजस्वी नक्षत्रः बालकृष्ण'समः' 'भावनायाः बौद्धिककोमलता एव कवितास्ति' इति गदितवान्। स्वच्छन्दतावादिकाव्यधारायाः प्रसिद्धः कविः लक्ष्मीप्रसाददेवकोटा 'हृदयं हृदयं आह्वयतु कवितायाम्, सरले सत्ययुतः अनावृतं पर्वतमिव महत्त्वपूर्णं भावं भवतु कवितायाम्, यतः नालाः (जलमूलं)

---

[८] रमणीयार्थप्रतिपादकः शब्दः काव्यम् ॥(रसगंगाधर पृ.९)

[९] रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चाह्लादगतश्चमत्कारत्वा-परपर्यायोऽपरसाक्षिकः पुनरनुसन्धानात्मा। 'पुत्रस्ते जातः', 'धनं ते दास्यामि' इति वाक्यार्थधीजन्याह्लादस्य न लोकोत्तरत्वम्। अतो न तस्मिन् वाक्ये काव्यत्वप्रसक्तिः ॥(रसगंगाधरः पृ.९-१०, प्रथमम् आननम्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वतस्फूर्तरूपेण उद्बुद्धाः समुत्पन्ना भवन्ति' इति निगदितवान्। प्रा.मोहनराजशर्मा प्रा.डा.दयारामश्रेष्ठश्च 'कविता भावनात्मकस्य बौद्धिककथ्यस्य वा पद्यलयात्मिका संरचनास्ति' इति भणितवन्तौ। प्रा.डा.वासुदेवत्रिपाठी 'मानवमनसः अनुभूतीनां लयात्मकं भाषिकं कलात्मकं कथनमेव कवितास्ति' इति कथितवान्।

एताषां परिभाषाणामध्ययनेन 'भावविचारयोः लयात्मिका प्रस्तुतिरेव कविता' इति निष्कर्षो जायते। संस्कृतसाहित्येऽपि रसवादी, अलङ्कारवादी, ध्वनिवादी, रीतिवादी, वक्रोक्तिवादी कवयो दृश्यन्ते। ते च कवयः स्वस्य सिद्धान्तानुसारं कवितायाः परिभाषां कुर्वन्ति, अथ च ते कवितायाः परिभाषामपि स्वसिद्धान्तानुकूलनं विधाय व्याख्यां कुर्वन्ति। एवञ्च अंग्रेजीसाहित्ये नेपालीसाहित्ये च तादृशी एव प्रवृत्तिः दृश्यते। यथा अरस्तुमहोदयः तस्य परिभाषा च अनुकरणसिद्धान्तात् प्रभाविता। एवञ्च वर्डस्वर्थस्य परिभाषा स्वच्छन्दतावादस्य चिन्तने संयोजिता दृश्यते। बालकृष्णसमस्य बौद्धिककवित्वात् स भावनायाः बौद्धिककोमलता एव कविता इति मन्यते। एवञ्च लक्ष्मीप्रसाददेवकोटा स्वच्छन्दतावादी कविरस्ति खलु, अतः एव तदनुसारं परिभाषां कर्तुमीहते।

संस्कृतसाहित्यं वैदिकसाहित्यम् उत्तरवैदिकसाहित्यमिति द्विधा विभज्यते। वैदिकसाहित्यं हि कवितामयं दृश्यते चेत् उत्तरवैदिकसाहित्यञ्च कवितामयं विभाति। ऋग्वेदं पद्यमयं विराजते, अतः तत्र कवितायाः स्वरूपं द्रष्टुं पार्यते। अन्येषु वेदेषु च कवितायाः स्वरूपं प्राप्तुं शक्यते। उपनिषत्सु च मधुरा, बौद्धिकमयी, दार्शिनिकी च कविता लभ्यते। गीता स्वयमेव बौद्धिक्याः, दार्शनिक्याः कवितायाः समवायः। रामायणे, महाभारते, पुराणेषु, तन्त्रेषु, स्मृतिग्रन्थेषु, नीतिशास्त्रेषु च कवितातत्त्वं प्राप्यते। ज्योतिषग्रन्थाः, शिक्षाग्रन्थाः, अनेके च दार्शनिकग्रन्थाश्च कवितामयं विराजन्ते।

विकीर्णा स्फुटकविता, सुभाषितकविता, रतिरागात्मिकाः कविताः, एवञ्च प्रकृतिवर्णनात्मकं, हास्यव्यङ्ग्यात्मकं, करुणरसात्मकं, वीररसात्मकं नीतिचेतनामूलकं, भक्तिपरकं, स्तुतिपद्यं, दार्शनिकं विकीर्णात्मकं कविवचनं विविधभावेषु रचिताः लसिताः सन्ति संस्कृतवाङ्मये।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२. खण्डकाव्यम्

संस्कृतसाहित्ये खण्डकाव्यस्य विषये नाधिकं चर्चा परिचर्चा कृतास्ति। आचार्यविश्वनाथेन साहित्यदर्पणे महाकाव्यस्य चर्चाक्रमे खण्डकाव्यस्यापि चर्चा विहितास्ति । एवञ्च मेघदूत-खण्डकाव्यं आदर्शखण्काव्यत्वेन उपस्थापितं विद्यते। 'महाकाव्यस्य अंशस्वरूपं प्रबन्धकाव्यं खण्डकाव्य'मिति कथ्यते। पौरस्त्यसाहित्ये दण्डी, रुद्रट्, विश्वनाथश्च खण्डकाव्यस्य स्वरूपं विमृशन्ति।

२.१ खण्डकाव्यस्य परिभाषा

विश्वनाथः **'खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च'** इति परिभाषां करोति। एवञ्च स 'यथा मेघदूतादिः' प्रणिगद्य कालिदासस्य मेघदूतखण्डकाव्यं आदर्शरूपं मनुते। कालिदासस्य मेघदूतस्य अध्ययनं विधाय खण्डकाव्येन एतादृशेन भवितव्यमिति अनुमातुं शक्यते। एतावता महाकाव्यस्य एकदेशस्य अनुसरणशीलं प्रबन्धरचनाविशेषं खण्डकाव्यमिति मान्यता स्थापयितुं शक्यते। खण्डकाव्ये सामान्यतया सर्गसंख्या आष्टसर्गेभ्यः न्यूना स्यात्, जीवनस्य एकांशस्य प्रस्तुतिः, आधिकारिकस्य मूलकथानकस्य वा प्रयोगः स्यात्, एकस्यैव रसस्य प्रयोगः स्यात्, स्वल्पपात्राणामुपस्थितिः स्यात्, कथायाः, पात्राणां घटनायाश्च एकोन्मुखता स्यात्। एतादृशं विशेषतायुक्तं काव्यं खण्डकाव्यं भवितुमर्हति।

खण्डकाव्यं स्वल्पाकारप्रकारे ग्रथितं भवति। लघ्वाकारमस्य वैशिष्ट्यम्। खण्डकाव्ये विषयवस्तुप्रस्थापनस्य लघुतायुत आयामः स्यात्, यत्र अल्पपञ्चसन्धियुतं, एकरसं एकस्यैव छन्दसः प्रयोगः विधातव्यः। संरचनागत-तीव्रता, आख्यानस्य लघुता, कथावस्तौ उद्देश्यस्य चैकोन्मुखता, रसभावयोः क्षिप्रता इत्यादिषु विषयेषु विमृश्य कवितायाः मध्यमरूपं खण्डकाव्यमिति गदितुं शक्यते। खण्डकाव्ये जीवनजगतोः एकांशस्य प्रस्तुतिर्जायते। यथा आधुनिककथायां, एकाङ्करचनायां, खण्डकाव्ये च जीवनजगतोः एकांशपक्षस्य प्रस्तुतीकरणं विहितं दृश्यते। परन्तु एतेषु विधातात्त्विकं वैभिन्यं तु भवत्येव।

आधुनिकदृष्ट्या खण्डकाव्ये कथानकं, चरित्रं, वातावरणं, जीवनदृष्टिः भाषाशैलीसहितं पञ्चतत्त्वानि निहितानि भवन्ति। एतेषां खण्डकाव्यविवेचनासूत्राणामाधारे खण्डकाव्यानाम् अध्ययनं, व्याख्यानं विश्लेषणं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

च विधातव्यं भवति । संस्कृतसाहित्यस्य आचार्याः मेघदूतमेव आदर्शमयं खण्डकाव्यमिति मन्वते । नेपालिभाषायां **गौरी, राष्ट्रनिर्माता, राजेश्वरी, पापिनी आमा, हुस्सु पथिक, देवयानी**इत्यादीनि अनुकरणीयानि खण्डकाव्यानि परिलसन्ति । नेपालिभाषायां पाश्चात्यप्रभावेऽपि बहूनि खण्डकाव्यानि लिखितानि सन्ति । नाटकशिरोमणेः बालकृष्णसमस्य **'आगो र पानी'**इति, महाकवेः लक्ष्मीप्रसाददेवकोटामहोदयस्य **'मायाविनीसर्सी'** इति अन्यानि च खण्काव्यानि पाश्चात्यप्रभावे रचितानि सन्ति ।

२.२ खण्डकाव्यस्य वर्गीकरणम्

विभिन्नेषु आधारेषु खण्डकाव्यस्य वर्गीकरणं कर्तुं शक्यते । यथा

(क) शैल्याधारे खण्डकाव्यस्य वर्गीकरणम्

(अ) **शास्त्रीयछन्दसि रचितानि खण्डकाव्यानि**- संस्कृतभाषायां नेपालिभाषायाञ्च अनेकानि खण्डकाव्यानि शास्त्रीयछन्दसि रचितानि सन्ति । यथा संस्कृतभाषायां भरतराजधिमिरेमन्थलीयस्य मोतीवृत्तम् कृष्णाभिसर्पणम्, भक्तविजयकाव्यम्, जयदेवस्य गीतगोविन्दम्, जगन्नाथस्य गङ्गालहरी इत्यादीनि काव्यानि । नेपालिभाषायां यथा **गौरी,राष्ट्रनिर्माता, राजेश्वरीहुस्सु पथिक, देवयानी** इत्यादीनि काव्यानि सन्ति ।

(आ) **लोकलये रचितानि खण्डकाव्यानि**- संस्कृते अनेकानि काव्यानि खण्डकाव्यानि शास्त्रीयछन्दसि एव रचितानि सन्ति । परन्तु कतिपयनेपालिखण्डकाव्यानां संस्कृते अनुवादश्च विहितो दृश्यते यथा लक्ष्मीप्रसाददेवकोटावरस्य **मुनामदन** इति खण्डकाव्ये 'नेपालिझ्याउरे' लोकलयस्य प्रयोगो दृश्यते, अस्यानुवादं कवि माधवप्रसाददेवकोटा समकरोत् । एवञ्च राधेश्यामभट्टराईमहोदयस्य **हलेसीति काव्यस्य** संस्कृतानुवादं 'नेपालिझ्याउरे' इति लोकलये अनुवादो विहितो वर्तते । अस्यानुवादं प्रा. रामहरिदाहालो व्यदधात् ।

(इ) **स्वच्छन्दलये**- नेपालिभाषायां स्वच्छन्ददगद्यलयेऽपि अनेकानि खण्डकाव्यानि काव्यानि च रचितानि सन्ति, परन्तु संस्कृतभाषायाम् एतादृशानि काव्यानि नेपाले नैव दृष्टानि । नेपालिभाषायाम् उर्वशी इत्यादीनि चास्योदाहरणानि ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(ई) **स्वतन्त्रगद्यलयः-** स्वतन्त्रगद्यलये नेपालिभाषायामनेकैः कविभिः खण्डकाव्यानि रचितानि सन्ति यथा **आगो र पानी, मायाबिनी सर्सी** इत्यादिः। परन्तु नेपाले अधुनापर्यन्तम् एतादृशं खण्डकाव्यं नैव दृश्यते।

(ख) भावस्याधारे

भावस्याधारेऽपि खण्डकाव्यस्य वर्गीकरणं कर्तुं शक्यते। यथा -

(अ) शोक-करुणा - यत्र खण्डकाव्ये शोककरुणयोः भावं क्षीप्रं प्रदीप्तं च भवति तत्र एतादृशं काव्यम् अस्मिन् वर्गे स्थापयितुं शक्यते। यथा- संस्कृतभाषायां टीकारामस्य अश्रूपहारम्, मदीयं मातृशतकं काव्यम्। नेपालिभाषायां गौरी, राजेश्वरी इत्यादीनि खण्डकाव्यानि समायान्ति।

(आ) वीरभावना - वीरभावयुक्तं वा वीररसयुक्तं खण्डकाव्यं अस्मिन् वर्गे समायान्ति। यथा- संस्कृतभाषायां ललितावल्लभस्य भक्तविजयम्, पृथ्वीन्द्रोदयम्। मदीयं पृथ्वीशतकम्। नेपालिभाषायां राष्ट्रनिर्माता, हिमज्योति इत्यादीनि खण्डकाव्यानि परिलसन्ति।

(इ) प्रेमभावना - प्रेमभावयुतानि शृङ्गारभावयुतानि वा खण्डकाव्यानि अस्मिन् वर्गे समायान्ति। यथा कालिदासस्य मेघदूतः एवञ्च संस्कृतभाषायां रोहिणीप्रसादखनालस्य **क्षमा**-काव्यम् तदनुप्रकाशितं **गृहस्थकाव्यम्**। यथा नेपालिभाषायां पिकदूत, ल्हुनी, म्हेन्दु आदयः।

(ई) दार्शनिकभावना - दार्शनिकभावधारायामपि खण्डकाव्यानि लिखितानि सन्ति। यथा संस्कृतभाषायां टीकारामस्य **बुद्धस्मरणं काव्यम्,** धनञ्जयमरासिनीमहोदयस्य **हरिहरप्रार्थनापुष्पाञ्जलिः।** नेपालिभाषायां यथा च ते । आगो र पानी, सूर्यदान, बुद्धिविनोद इत्यादीनि काव्यानि।

(ग) विषयवस्तूनामाधारे - विषयवस्तूनामाधारे च खण्डकाव्यस्य वर्गीकरणं कर्तुं शक्यते।

(अ) ऐतिहासिकविषयः - यथा संस्कृतभाषायां मदीयं पथ्वीशतकम्। ललितावल्लभस्य भक्तविजयम्, टीकारामस्य नेनेपालवृत्तम्, बुद्धस्मरणम्। नेपालिभाषायां राष्ट्रनिर्माता, राजेश्वरी, अमरसिंहको सन्देश इत्यादीनि सन्ति।
(आ) सामाजिकविषयः - संस्कृतभाषायां भागवतशर्मरिजालस्य जागेश्वरचरिम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामाजिकविषयमवलम्व्य नेपालिभाषायां विविधानि खण्डकाव्यानि रचितानि सन्ति । मुनामदन, पापिनी आमा, कुञ्जिनी इत्यादीनि सन्ति । (इ) **प्रकृतिचित्रण** -लेखनाथस्य ऋतुविचारः सानुवादः, मुकुन्दशरणस्य प्राकृतपोखरा सानुवादः इत्यादीनि । **(ई) पौराणिकविषयम्**-संस्कृते यथा रुरुवृत्तम्, नेनेपालकाव्यम्, । नेपालिभाषायां उर्वशी, देवयानी, सीताहरण इत्यादीनि सन्ति । (ङ) नैतिक-नीतिशतकम्, वैराग्यशतकम् । नेपालिभाषायां सत्यकलिसंवाद, अमर ज्योतिको सत्यस्मृति, हुस्सुपथिक इत्त्यादीनि ।

३. संस्कृतखण्डकाव्यानां संक्षिप्तं विवरणम्

(क) प्राचीनकालीनखण्डकाव्यम्- काव्यस्य खण्डकाव्यस्य बीजं वैदिकसूक्तेषु प्राप्यते । वेदनां सूक्तेषु अनुवाक्षु च भावस्य विचारस्य वा एकं खण्डं, एकविषयक्षेत्रे एकभावप्रवाहस्य एका अभिव्यक्तिः प्राप्यते । वैदिकसूक्तानामेव प्रभावः खण्डकाव्यरचनायामपि समापतदिति अनुमातुं शक्यते । लौकिकसाहित्ये कालिदासस्य मेघदूतमेव प्रथमखण्डकाव्यमिति तद्विषयविज्ञाः कथयन्ति । विश्वनाथादिसमीक्षकैः खण्डकाव्यस्य विवेचनायां मेघदूतं काव्यमेव उदाहृयते । इदं काव्यं पूर्वमेघम् उत्तरमेघम् इति द्वेधा भिक्तमस्ति । कालिदासस्य **ऋतुसंहारः इति च** अन्यतरं प्रकृतिकाव्यम् उपलब्धमस्ति । अस्मिन् काव्ये ६ सर्गाः, १५३ श्लोकाश्च सन्ति ।

(ख) भारतवर्षीय-शिलालेखीखण्डकाव्यम्- कतिपयाभिलेखेषु च खण्डकाव्याकारं रचनाविशेषं मिलति । तत् कविकर्म खण्डकाव्यमिति रूपेण स्थापितं वर्तते । अस्मिन् क्षेत्रे हरिषेणस्य नाम अग्रपङ्क्तौ समायाति । हरिषेणः समुद्रगुप्तस्य सभापण्डितः प्रतिभाशाली रचनाकारश्चासीत् । हरिषेणः **समुद्रगुप्तस्य प्रशस्तौ प्रशंसायां च तस्य** व्यक्तित्वं प्रकाशयन् सुन्दरं रचनारत्नं लिखितवानासीत्, तत्र भारतस्य प्रयागक्षेत्रे खीष्टाब्दस्य ३४५तमे वर्षे स्थापितः **अशोकस्तम्भः अद्यापि द्रष्टुं शक्यते ।** तेन शिलापत्रकाव्येन हरिषेणस्य पिता ध्रुवभूतिरासीत्, सोऽपि गुप्तभूपानां महादण्डनायकः (न्यायाधीशः) आसीत् । हरिषेणः सन्धिविग्रहिकः (परराष्ट्रसचिवः) आसीदिति सूचना मिलति । गद्यपद्यभाषायां रचितोऽभिलेखः कालिदासस्य प्रभावं पदचिह्नं वा वरीवर्ति (गैरोला, सन् १९७५ : ८८९) ।

अपरो कविः वीरसेनः । वीरसेनश्च चन्द्रगुप्तद्वितीयस्य (ई.३७५-४१४) सभापण्डितः आसीत् । भारतस्य मालवास्थानस्य उदयगिरौ भगवतः शिवस्य

Jayatu Saṇskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एका गुहा निर्मितास्ति। तस्यामेव गुहायां वीरसेनः एकं अभिलेखं उत्कीर्णं कृतवान्। वीरसेनोऽपि सन्धिविग्रहिकः सचिवः आसीत् इति सूचना च अभिलेखतः प्राप्यते (गैरोला, १९७५ : ८९०)। अन्यः प्रातिभो भाट्टकाविः यस्य नाम वत्सभट्टिरासीत्। अयं कविः पञ्चमशतकस्य कुमारगुप्तस्य समकालिको दृश्यते। मन्दसौरस्थे सूर्यमन्दिरे ४४ श्लोकेषु कवितानेन विरचय्य शिलापत्रे समुत्कीर्णास्ति। मन्दसौरस्य स्थानीयराजा बन्धुवर्मणः वसन्तवर्णनं, वर्षावर्णनञ्च सुन्दरं कवित्वपूर्णं च मान्यते (गैरोला, १९७५ : ८९१)। अन्यतरः कविः रविशान्तिरस्ति । स चायं कविः मौखरीनरेशस्य सभापण्डितः आसीत्। अस्य कवेः उत्तरप्रदेशस्य हरहाग्रामस्य शिलालेखः ई. ५५५ वर्षे शिलापत्रे समुत्कीर्णः (गैरोला, १९७५ : ८९१) इत्यनुमीयते। मौखरीवंशे हरिवर्मा, तस्य पुत्रः आदित्यवर्मा, तस्य पुत्रः ईश्वरवर्मा, तस्य पुत्रः ईशानवर्मा आसीत्। ईशानस्य समये शिवमन्दिरस्य जीर्णोद्धारो विहितः, अतः तस्य राजवंशस्य च वर्णनं कृतमस्ति।

पञ्चमशतकस्य वासुलः मालवनरेशस्य यशोधर्मन्भूपतेः सभापण्डितः आसीत्। मन्दसौर-प्रशस्तिशिलापत्रे तस्य रचना उत्कीर्णास्ति।

एवञ्च रुद्रदामनस्य गिरनार(जूनागढ)स्थानस्य अभिलेखः विक्रमस्य ७२तमे शतके संस्कृतगद्यभाषायां लिखितोऽस्ति। रुद्रदामनः महाक्षत्रपस्य चष्टनस्य पौत्रः, जयदामनस्य पुत्रः आसीत्। स खीष्टाब्दस्य १४० वर्षपर्यन्तं शासनं चकार। अन्यच्च देहलीनगरस्य दक्षिणस्यां दिशि ९ मिलमापिते दूरे महरौलीनामको ग्रामः विराजते, तत्र लौहस्तम्भः वर्तते, तत्र ब्राह्मीलिप्यां संस्कृतभाषायां शार्दूलविक्रीडितछन्दसि अभिलेखो टङ्कितोऽस्ति। एवञ्चात्र समयस्य भूपतेश्च नाम न। चन्द्रः इति सूचितः। चन्द्रः इति कथनेन चन्द्रगुप्तद्वितीयस्य बोधो जायते इति विदुषां मतमस्ति।

जूनागढ (गुजरात) जनपदस्य गिरनारपर्वते स्कन्दगुप्तस्य अभिलेखः दाक्षिणात्यब्राह्मीलिप्यां संस्कृतभाषायां समुत्कीर्णोऽस्ति। अस्य समयः खीष्टस्य ४५६ वर्षमिति अनुमीयते। भगवन्तं श्रीवष्णुं प्रणम्य सुदर्शनभील इत्यस्य जीर्णोद्धारस्य विषयः अत्र प्रतिपादितोऽस्ति इति तज्ज्ञाः कथयन्ति। तत्सेतुः शतहस्तलम्बं, अष्टषष्ठि हस्तपरिमित प्रसृतः सप्तपुरुषसमः (४०फिट) उन्नतः, द्विशतहस्तगभीरतरः इति ऐतिह्याः गदन्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कन्दगुप्तस्य गाजीपुरजनपदस्य सैदपुरनिकटस्थः भितरीग्रामस्थः शिलालेखोऽपि गण्योऽस्ति । अस्मिन्नभिलेखे गुप्तवंशस्य वर्णनं विहितमस्ति । लिच्छविदौहित्रः, समुद्रगुप्तस्य प्रपौत्रः, घटोत्कचस्य पौत्रः, कुमारीदेवी-चन्द्रगुप्तयोः पुत्रः स्कन्दगुप्तः आसीत् । स्कन्दगुप्तस्य शिलालेखः उत्तरीब्राह्मीलिप्यां, संस्कृतस्य गद्यपद्ये लिखितः । पद्यकवितासु पुष्पिताग्रा, मालिनी, शार्दूलविक्रीडितं, अनुष्टुप् चेति छन्दांसि प्रयुक्तानि सन्ति ।

आदित्यसेनस्य अपरदशिलालेखश्च गणनीयोऽस्ति । विहारप्रान्तस्य गयाजनपदस्य सकारीनद्यास्तीरे अयमभिलेखः मिलितः । संस्कृतस्य पद्यभाषायां, उत्तरीब्राह्मीलिप्यां लिखितोऽभिलेखः । आदित्यसेनः स्वस्य वंशकेतूनां वर्णनं करोति । कृष्णगुप्तः, हर्षगुप्तः, जीवितगुप्तः, कुमारगुप्तः, माधवगुप्तः, आदित्यसेनः तस्य वंशे क्रमशोऽभूवन् । अस्मिन्नभिलेखे नेपालस्य लिच्छविभूपतेः सङ्केतोऽपि विहितोऽस्ति । आदित्यसेनस्य सेना ईशानवर्मण सेनया सह युद्धं चकार । अतः अस्य समयः खीष्टस्य ६४५ वर्षं यावत् परिव्याप्नोति ।

पुलकेशिनद्वितीयस्य ऐहोलस्याभिलेखः महत्त्वपूर्णोऽस्ति । अस्याभिलेखः वीजापुरजनपदस्य ऐहोलग्रामे रविकीर्तिनिर्मितजैनमन्दिरे मिलितः । पुलकेशी खीष्टस्य ६४३-६६६ वर्षं यावत् शासनमकरोत् । पुलकेशीप्रथमेन वाजपेययज्ञं, अश्वमेधयज्ञं, हिरण्यगर्भादियज्ञं सम्पाद्य स्वस्य परिचयो दत्तः । अयं शिलालेखः संस्कृतपद्यभाषायां दाक्षिणात्यब्राह्मीलिप्यां लिखितः । अस्मिन् शिलाकाव्ये विंशत्यधिकाः श्लोकाः दशाधिकानि छन्दांसि प्रयुक्तानि सन्ति ।

नेपालेऽपि अनेकेषु कालखण्डेषु लिखितेषु शिलापत्रेषु खण्डकाव्यमयी रचना प्राप्यते ।

(ग) खण्डकाव्यम् - संस्कृतभाषायां खण्डकाव्यस्तराणां मध्यमरूपाणां स्वल्पाकारप्रकारकाणां खण्डकाव्यानां ग्रन्थाः दरीदृश्यन्ते । कालिदसपश्चात् प्रथमशताब्दौ मातृचेटः उत्तमरचनाकाररूपेण उदितवान् । तेन महाराजकनिष्काय सम्प्रेषितः ८५ श्लोकात्मकः 'महाराजकनिष्कः' इति काव्यलेखः भारते नष्टेऽपि तिब्बतीभाषामनुदितो लेखः सुरक्षितो वर्तते । चतुश्शतकं श्लोकयुतं काव्यं **'चतुश्शतकम्'** एवञ्च सार्धशतकश्लोकयुतम् **अध्यर्धशतकं काव्यं** सुन्दरं स्फुटस्तोत्रकाव्यं नमुनायुतमस्ति (सुवेदी २०३७ : ११२) । मातृचेटपश्चात् चतुर्थशतके जायमानो बौद्धकविः आर्यशूरः दृश्यते तस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिमितासमासो नामकं ३६४ श्लोके प्रसृतं षट्सर्गात्मकं काव्यम् उपलब्धमस्ति ।

भर्तृहरिमहोदयस्य त्रिशतकयुतं, **भर्तृहरिशतकत्रयम्** इति काव्यं लभ्यते । अस्मिन् काव्ये शृङ्गारशतकं, नीतिशतकं, वैराग्यशतकञ्च समवेतरूपेण विन्यस्तमस्ति । भर्तृहरिः सप्तमशतकस्य कविरस्ति, अस्य काव्यम् अत्यन्तं सशक्तं, सुन्दरं प्रभावपूर्णञ्च विद्यते (मिश्रः, २०१७ : ९०) । यथा वैराग्यशतके

वाञ्छा सज्जनसंगमे गुणिगणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते यत्र वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥

संस्कृतसाहित्ये भर्तृहरिः कः इति विषये विभिन्नं मतं विद्यते । तथात्वेऽपि भर्तृहरिशतकस्य वाक्यपदीयस्य रचनाकारः एकः एवेति विदुषां धारणास्ति (सुवेदी, २०३७ : २७२) । एवमेव अष्टमशतकस्य भल्लटः **भल्लटशतकम्** अलिखत् । सप्तदशकस्य मधुसूदनस्य **मधुसूदनशतकम्,** सप्तदशकस्यैव हरिहरोपाध्यायस्य **हरिहरसुभाषितम्** काव्यमपि स्मरणीयमस्ति (मिश्रः, २०१७ : ९०) । अथ च अमरुकः अन्यतमो रचनाकारः । अस्य **अमरुकशतकम्** प्रसिद्धमस्ति । वामनः अमरुकस्य श्लोकम् उद्धरति अतोऽयं अष्टमशतकस्य कविरिति बोध्यते । यथा शृङ्गारशतके सुन्दरं शृङ्गारमयं भावं व्यनक्ति -

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनैः
निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम् ।
विश्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता ॥

जयदेवः स्फुटकविषु गण्यते । तस्य **गीतगोविन्दं** नेपालभारतयोः प्रसिद्धं काव्यम् । जयदेवः बङ्गालस्य लक्ष्मणसेनस्य सभापण्डितः आसीत्, अस्य समयः १३ शतकः (१२७५-१३२९) मन्यते (मिश्र, २०१७ : ८५) । नेपले नेवारीसमाजे अस्य जयदेवस्य गीतगोविन्दकाव्यस्य गायनपरम्परा च दृश्यते । जयदेवेन उल्लिखितः लक्ष्मणसेनस्य सभापण्डितः द्वादशशतकस्य प्रारम्भस्य

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोवर्धनाचार्यस्य **आर्यासप्तशती** नामकं काव्यं सुन्दरं प्रतिभाति । अन्यतमः कविः पण्डितराज जगन्नाथः मुस्लिमभूपस्य शाहजाँहामहोदयस्य सभापण्डितः आसीत् । यवनयुवत्यामाशक्तः कविः खीष्टस्य १६७४ वर्षे दिवङ्गतः । अस्य कवेः त्रयोदशग्रन्थाः प्राप्यन्ते । तेषु **गङ्गालहरी** (५२ श्लोकात्मिका) **भामिनीविलासः** कवितासङ्ग्रहश्च विराजेते (मिश्र, २०१७ : ८९) ।

नेपालस्य संस्कृतखण्डकाव्यस्य परम्परा

४.नेपालस्थानां खण्डकाव्यानां विवरणम्

नेपाले अनेकानि खण्डकाव्यानि समुपलभ्यन्ते । लिच्छवि-मल्ल-शाहकालेषु कविभिः अनेकानि खण्डकाव्यानि महाकाव्यानि च लिखितानि सन्ति ।

(क) लिच्छविकालः- लिच्छविकालः वैक्रमाब्दस्य पूर्वं ५ शतकतः प्रारम्भो जायते । परन्तु तस्य तथ्यं नैव मिलति । एवञ्च अष्टमशतकपर्यन्तं यावत् हस्तलिखितानि ग्रन्थरत्नानि नैव मिलन्ति ।

तदानीन्तनसमये मुद्रणयन्त्राणि नासन्, जनाः मूलपुस्तकं सङ्गृह्य प्रतिकृतिरूपं लिखन्ति स्म । एतादृशानां केषाञ्चन पुस्तकानां नामानि प्राप्यन्ते । तथात्वेपि ते न काव्यग्रन्थाः ।

लिच्छविकालस्य द्विशताधिकानि अभिलेखपत्राणि विभिन्नस्थानेषु दृश्यन्ते । एतेषु अभिलेखेषु लिच्छविकालिकानां काव्यानां दिग्दर्शनं मिलति, ऐतिहासिकविषयवस्तूनि च वर्तन्ते । तेषु अभिलेखेषु रचनायाः स्तरं, आकारप्रकारस्य स्थितिः, विषयवस्तुविन्यासशैली, भाषाव्याकरणस्य दृष्ट्या च विचारः क्रियते चेत् चाँगुनारायणस्य मानदेवस्य अभिलेखः, हाँडीग्रामस्य अनुपरमस्य द्वैपायनस्तुतिः, जयदेवस्य पशुपतिस्थितोऽभिलेखः, शिवरुद्रस्य वर्णनभूतो द्वादशशतकस्य अभिलेखः खण्डकाव्यस्तरयुताः सन्ति ।

(अ) मानदेवस्याभिलेखः - चाँगुनारायणस्य मन्दिरे अयं शिलालेखः स्थापितो दृश्यते । अस्मिन् शिलालेखे १९ श्लोकरत्नानि विलसन्ति । अत्र सर्वे च श्लोकाः शार्दूलविक्रीडितछन्दसि लिखिताः सन्ति । एवञ्च अत्र शिलास्तम्भोऽपि भग्नो दृश्यते, अतः श्लोकाश्च खण्डिताः सन्तीति विदुषां मतं विराजते ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्मिन् शिलालेखे मानदेवस्य पितृपितामहानां मातुश्च नाम दृश्यते। पितृपितामहानां मातुः नाम च उल्लेखितमस्ति। मानदेवस्य पितुः मरणपश्चात् कतिपयाः पूर्वपश्चिमस्था राजानः उपराजानश्च स्वतन्त्रराज्यधुरं स्थापयितुं प्रयत्नरता अभूवन्, मानदेवः तान् सर्वान् दमयित्वा सुदृढं राज्यं विनिर्माय बृहद्यज्ञञ्चकार किल। यथा -

प्रायात् पूर्वपथेन तत्र च शठा ये पूर्वदेशाश्रयाः
सामन्ताः प्रणिपातबन्धुरशिरः प्रभ्रष्टमौलिस्रजः।
तानाज्ञावशवर्तिनो नरपतिः संस्थाप्य तस्मात् पुनः
निर्भिः सिंह इवाकुलोत्कटशटः पश्चाद्भूमिञ्जगिमवान् ॥१६॥

अस्याभिलेखस्यादौ एव 'संवत् ३८६ ज्यैष्ठमासे शुक्लपक्षे, प्रतिपदि १' इति लिखितमस्ति। अस्य वाक्यस्य अर्थं विलोक्य, समयसारिणीम् ऐतिहासिकतथ्यञ्च विचार्य धनवज्रवज्राचार्येण लिच्छविशकादि-विभिन्नसंवतां तुलनां विधाय विक्रमस्य संवत् ५२१ (३८६ +१३५ = ५२१) इति सिद्धं विहितमस्ति। अयं शिलालेखः नेपालस्यैव प्रथमः शिललेख इति मान्यता स्थापिता। तथापि प्रा.डा. वेणीमाधवढकालः पुरातत्त्वविभागस्य 'नेपाल' इति पत्रिकायां (११९ अङ्कम्, २०४७) प्रकाशितः विक्रमसंवतः ५१६ इत्यस्य १२ श्लोकात्मकः **पशुपतिप्राङ्गणाभिलेखः** एव नेपालस्य प्रथमोऽभिलेखः इतिं मान्यतां स्थापयति।

(आ) अनुपरमस्य द्वैपायनस्तुति : काष्ठमण्डपस्थे 'हाँडीगाउँ' इति स्थाने प्रसिद्धो 'डबली' विद्यते, ततः नीचैः गत्वा सत्यनारायणस्य मन्दिरं प्राप्यते, मन्दिरस्य पश्चिमभागे पूर्वाभिमुखोऽभिलेखस्तम्भः स्थापितोऽस्ति। अस्मिन्नभिलेखे तिथिमितिः नैव मिलति, परन्तु अयं शिलास्तम्भः वसन्तदेवस्य समये (मानदेवपश्चात्) उत्कीर्णः स्थापितश्चेति प्रमाणीकृतः। अन्येषु शिलालेखेषु च तुलनां विधाय विवेचनं कृत्वा अस्य रचनाकारः अनुपरम इति सिद्धो भवति। तस्य अनुपरमस्य पत्नी आभीरी आसीत्, अनुपरमस्य पुत्रो भौमगुप्तः आसीत्। अनुपरम संवत् ४६२ (४६२+१३५=५९७ वि.सं) पूर्वमेव स्वर्जगाम। अस्मिन्नभिलेखे ७३ पङ्क्तयः लिखिताः टङ्किताश्च सन्ति। परन्तु प्रारम्भस्य शीर्षभागस्य कतिपयश्लोकाः नष्टाः सन्ति। कतिपयाक्षराणि नैव बोध्यन्ते। अस्य शिलास्तम्भस्य पौर्वापरम् अध्ययनं विधाय ३१।३२ श्लोकेषु रचना प्रसृतेति गदितुं शक्यते। अस्मिन् पद्यमयेऽभिलेखे ४।५ छन्दांसि प्रयुक्तानि सन्ति, तेषु

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शार्दूलविक्रीडितम्, स्रग्धरा, मालिनी, इनद्रवज्रा इतयादयः । अभिलेखे वेदव्यासस्य प्रशंसा, पुराणानां ब्रह्मसूत्रस्य, महाभारतस्य, नीतिसूत्राणाञ्च उल्लेखोऽस्ति, अतः नेपाले ऐतेषां ग्रन्थानामुपस्थितिः आसीदित अनुमातुं शक्यते । यथा वेदव्यासस्य प्रशंसा विहिता, ततः एकः श्लोकः -

सौक्ष्मयाद् दुर्बोधमीशं स्यितमपि सकलं लोकमावृत्य तन्वा
वाग्बुद्ध्योरप्यतीता (कृति) रपि मुनिभिः स्वागमाद् ध्याततत्त्वम् ।
विद्यारूपं विशुद्धे पदमनतिशयक्षीणसंसारबन्धं
स्यादात्मामन्नजातु त्वमिव कथयिता कश्चिदन्यो द्वितीयः ॥

(वज्राचार्य, २०३० : १६१)

(इ) पशुपति-अभिलेख : पशुपतिमन्दिरस्य पशिचमदक्षिणयोः कोणे, वा नैऋतयकोणे वा कतिपयाभिलेखाः स्थापिताः सन्ति । तेषु अभिलेखेषु जयदेवद्वितीयस्य पशुपतिरभिलेख अप्येक । अभिलेख ३४ श्लोकेषु प्रसृतोऽस्ति । अयमभिलेखः लिच्छविसंवतः १५७ वर्षे स्थापितो दृश्यते । समयसारिणीं विचार्य, गणितं विधाय जयदेवद्वितीयस्य समयः विक्रमसंवत् ७१३-७३३ इति निर्णयीकृतः । अस्मिन्नभिलेखे राज्ञः जयदेवस्य राचना ५ श्लोकाः सन्ति तदनन्तरं र बुद्धकीर्तिमहोदयेन रचिताः २९ श्लोकाः सन्ति । एवञ्च अयं शिलालेख परिपूर्णः अस्ति, एकार्धस्थलेषु एव खण्डितो विद्यते । अस्मिन् शिलालेखे ब्रह्मणः प्रपौत्रः सूर्यः, ततः मनु-इष्वाकु-विकुक्षि-ककुत्स्थ-विश्वगश्वसहिताः अष्टाविंशति(२८) भूपतयः समजायन्त, तदनन्तरं अस्मिन्नेव वंशे सगर-असमञ्जस-अंशुमान्-दिलीप-भगीरथ-रघु-दशरथादयाः अष्टौ(८) भूपतयः, पश्चात् लिच्छविभूपतिः समजनि, तदनन्तरं अस्मिन्नेव कुले श्रीपुष्पनामको भूपतिः बभूव । अस्मिन्नेव कुले जयदेवः, वृषदेवः, धर्मदेवः, मानदेवः, वसन्तदेवः इत्यादयो भूपतयः समजायन्त । ते राज्यं चक्रुः ।

चतुर्दशश्लोकतः (१४) राज्ञः जयदेवद्वितीयस्य वर्णनं सुन्दरं साहित्यिकं चास्ति । साहित्यस्य स्तरीयभाषायां प्रशस्तिगानं विहितमस्ति । यत्र शब्दालङ्कारार्थालङ्कारयोः अनुपमः चमत्कारपूर्णः प्रयोगो विन्यस्तोऽस्ति । उपमायाः उत्प्रेक्षायाश्च चमत्कारः अपूर्वः दृश्यते अनुभूयते च । अत्र यमकालङ्कारस्य चमत्कारोपि पाठकानां भावकानां मनोहरति । अत्र अनुष्टुप्, उपजातिः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शार्दूलविक्रीडितम्, स्रग्धरा च छन्दांसि प्रयुक्तानि सन्ति। यथा यमकस्य चमत्कारः -

नालीनाली कमेतन्न खलु समुदितो राजतो राजतोऽहं
पद्मापद्मासमाब्जे कथमनुहरतो मानवा मा नवाभे ।
पृथ्वयां पृथ्वयान्न मादृग्भवति हृतजगन्मानसे मानसे वा
भास्वन् भास्वन् विशेषं जनयति न हि मे वासरो वा सरो वा ॥२३॥

(वज्राचार्यः, २०३० : ५५१)

(ई) शिवरुद्रस्य प्रशस्तिकाव्यम् : अनेकेषु शिलापत्रेषु नेपालस्य राष्ट्रियसंग्रहालये एकं शिलापत्रमस्ति। तत् पत्रं नेपालसंवतः २६४ तमे वर्षे टङ्कितम् आसीत्। तत् शिलापत्रं कस्मिन् प्रासादे वा शिवमन्दिरे आसीदित गदितुं नैव शक्यते, नेपालसंवतानुसारं विक्रमस्य द्वादशशताब्दी जायते। द्वादशशतकस्य पूर्वार्धे एत्रार्धे वा कस्मिन् वर्षे इदं पत्रं टङ्कितमिति न निश्चितम्। परन्तु अस्मिन् शिलालेखे ३३ श्लोकाः सन्ति। कश्चित्भागो नष्टोऽपि विद्यते। तथत्वेऽपि ३४।३५ श्लोकाः भवितुं शक्नुवन्तीति अनुमातुं शक्यते। अस्मिन् शिलापत्रे काशीनिवासी रुद्रस्वामी पशुपतिनाथस्य दर्शनार्थं पर्वतमार्गात् गजमारुह्य काष्ठमण्डपं समागतवान् (श्लोक १९)। शिवस्य स्तुतिपूर्वकं शिवरुद्रस्य (रुद्रशिवः) गुरोः उदितमूर्तिशिवस्य वर्णनं विहितमस्ति। कञ्चन समयं यावत् अत्रैव स्थित्वा शिवमन्दिरस्य जीर्णोद्धारं कृतवान्, राजपुत्रान्, नागरिकाँश्च दीक्षां दत्तवान्। पुनः स काशीं निवर्तितवान्।

पुनश्च पशुपतिनाथेन समाकर्णितमिव काष्ठमण्डपं समागतवान्। तस्मिन् समये आनन्ददेवः युवराजः आसीत्। तदा वसन्तदेवं, सोमेश्वरं, यशोमल्लं च स दीक्षां दत्तवान्। (श्लोकः २५) (वज्राचार्यः, २०६८:८१)[10]। त्रयत्रिंशसदधिकेषु श्लोकेषु प्रसृते शिलाकाव्ये अनुष्टुप्, शार्दूलविक्रीडितं, शिखरिणी, मन्दाक्रान्ता इत्यादि-छन्दसां प्रयोगो दृश्यते। काव्ये शब्दालङ्कारस्य अर्थालङ्कारस्य बहुधा प्रयोगः विहितोऽस्ति। यथा -

---

[10] शौर्येऽर्जुनसमः प्रेक्षः गुणांस्तेषु गुणप्रियः। भक्तिमजुर्नदेवोऽपि (विदधे वा विबुधे) ष्विव।वसन्तदेवो विज्ञानी धीमान् सोमेश्वरस्तथा। यशोमल्लश्च तैरेव कुमारा दीक्षिता अमी ॥२५॥ (वज्राचार्यः, २०६८ : ८१)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गङ्गाजुष्टां विविधविबुधां विश्वकृद्राजधानीं
काशीं दासीकृतसुरपुरीं धीधनास्तां विहाय।
देवं द्रष्टुं पशुपतिमथानुग्रहीतुञ्च लोकान्
नेपालं ते गुरुगिरिंगजैरागमन् दुर्गमार्गम्॥ (वज्राचार्यः, २०६८ : ८१)

(ख).मल्लकालः - मल्लकालः कदा प्रारम्भो जातः ? अस्मिन् विषये मतान्तरं प्राप्यते। परन्तु द्वादशशताव्दीपश्चात् पृथ्वीनारायणशाहः यदा कान्तिपुरं विजितवान् तदापर्यन्तं ५०० वर्षं यावत् मल्लकालः इति मान्यते। मल्लकाले बहुषु विषयेषु अनेके ग्रन्थाः लिखिताः सन्ति। तत्र वेदवेदाङ्गानि, अष्टादशपुराणानि, रामायणं, महाभारतं, काव्यानि, नाटकानि, प्रबन्धग्रन्थाश्च लिखिताः सन्ति। तेषु ग्रन्थेषु खण्डकाव्यानि, महाकाव्यानि च विराजन्ते। नीतिवर्मणा १६२३ वैक्रमाब्दे विरचितं **कीचकवधकाव्यम्** महत्त्वपूर्णमस्ति। इदं काव्यं महाभारतीयकथायां समाश्रितं, ५पञ्चसर्गात्मकञ्चास्ति. (शर्मा, २०७६ : ४३)। त्रैलोक्यमल्लस्य पुत्रः जगज्जोतिमल्लः १६६८तमे वैक्रमाब्दे भक्तपुरस्य राजा बभूव। तेन मल्लेन नाटकानि नीतिसङ्ग्रहश्च लिखिताः सन्ति। (श्लोकसारसङ्ग्रहः) (सुवेदी, २०३७ : ३३८)। जगत्प्रकाशमल्लः १६३९तमे वैक्रमाब्दे समजनि। अनेन नाटकं र **पद्मसमुच्चयश्च** (कवितासंग्रहः) लिखितः। प्रताप मल्लः १६८० वैक्रमाब्दे बभूव। अयं भूपतिः कविराजरूपेण परिचितः। अस्य कवेः १०।११ स्तोत्राणि, **सर्वापराध-क्षमास्तोत्रम् र सङ्गीतदामोदरम्** इति द्वौ ग्रन्थौ काव्यस्तरयुतौ स्तः (सुवेदी, २०३७ : ३२५)। मान्धातुसिंहस्य १७३४ वैक्रमाब्दे लिखितं **गीतकेशवं** काव्यं महनीयमस्ति। मल्लकाले त्रिंशदधिकानि नाटकानि च विलिखितानि सन्ति।

(ग) शाहकालः- श्रीपञ्चकः पृथ्वीनारायणशाहः यदा कान्तिपुरं विजितवान् तदातः शाहकालस्य प्रारम्भो जायते। ललितावल्लभः अर्यालः १८२६तमे वैक्रमाब्दे **भक्तविजयम्** इति काव्यं व्यलिखत्। इदं काव्यम् अत्यन्तं सुन्दरं कलात्मकञ्चास्ति। काव्यञ्चेदं ३ सर्गे प्रसृतमस्ति। राजा पृथ्वीनाराण्यणशाहः काष्ठमण्डपं पाटनराज्यञ्च विना युद्धं विजितवान्। परन्तु भक्तपुरराज्यं जेतुं काठिन्यो ज्ञातः। बहुधनजनानां क्षतिः जाता। भक्तपुरविजयविषयमवलम्ब्य इदं काव्यं रचितमस्ति। यथा अस्मिन् काव्ये सर्वत्र अन्त्यानुप्रासः प्रयुक्तः दृश्यते। प्रथमश्लोके

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीदेराङ्गिरिसम्भवन्तं निरन्तरं व्योमवने चरन्तम् ।
अहं सहस्रांशुहरिं हरन्तं ध्वान्तेभयूथं प्रणमामि सन्तम् ॥१॥

नेपालस्यैकीकरणस्य विषयमवधार्य ललितावल्लभः१८२७तमे वैक्रमाब्दे त्रिसर्गात्मकं **पृथ्वीन्द्रवर्णोनोदयम्** काव्यम् अरचयत् । यथा प्रथमसर्गस्य प्रथमे श्लोके

गोरक्षाभिधपर्वतो विजयते गौरीगुरोर्दक्षिणे
कृष्णायाः सरितश्च पूर्वविषये शूलोद्भवापश्चिमे ।
यस्मिन् सिद्धवरोऽस्ति शङ्करतनुर्गोरक्षनाथाह्वयास्
तन्मध्ये नगरी विराजतितरां गोरक्षनाम्नाऽन्विता ॥१॥

गोरखाराजप्रासादस्य प्रभावशाली कविः शक्तिवल्लभः अर्यालः **जयरत्नाकरनाटकं हास्यकदम्ब**नाटकञ्च लिलेख किल । तथैव **सुधातरङ्गिणी एवञ्च ललितमाधवः** द्वौ ग्रन्थौ च रचयामास । शाहकालस्य अन्यतरो विद्वान् आसीत् वाणीवलासपाण्डे । स चायं कविः १८२७ तम वैक्रमाब्दतः १८८८ वैक्रमाब्दपर्यन्तं सक्रियः आसीत् । अयं कविः राजप्रासादीयकविः । अस्य कानिचन स्तोत्राणि शिलालेखाश्च विद्यन्ते (सुवेदी, २०३७ : ३६०) । शाहकालस्य अन्यप्रतिभास्ति सुन्दरानन्दबाणा । अस्य कवेः कानिचन ग्रन्थरत्नानि प्राप्यन्ते ।

गोरखाजनपदस्य वक्राङ्गाभिजनस्य गणेशप्रसाद-अर्यालस्य (विसं.१९६६-२०२४) **रामभक्तमाला** (वि.सं.२०१५)प्रकाशितोऽस्ति । मङ्गलाचरणे २३ श्लोकसहितं सम्पूर्णं काव्यं १६५ श्लोके विस्तारितमस्ति । अस्मिन् काव्ये रचनाकारस्यैव समच्छन्दसि नेपालीभाषानुवादश्च प्रकाशितोऽस्ति । अर्यालः गायत्रीपुरश्चरणपश्चात् गायत्रीगणेशनाम्ना प्रसिद्धो जातः । गायत्रीगणेशस्य १०१ श्लोकात्मकं **महेन्द्रशतकं** खण्डकाव्यं, ७० श्लोकात्मकं **वंशवर्णनं** काव्यमपि **पण्डितगायत्री-गणेशस्मृतिग्रन्थे** (२०६२) प्रकाशिताः सन्ति । गोरखाकाफलडाडाभिजनः पूर्णप्रसादुवाडी'ब्राह्मण'स्य महेन्द्रसंस्कृतविश्वविद्यालयतः २०४९तमे वैक्रमाब्दे प्रकाशितं, पञ्चसर्गात्मकं ४५७ श्लोके विस्तारितं **रामराज्यम्** खण्डकाव्यं वैचारिकदृष्ट्या महनीयमस्ति, ब्राह्मणस्यैव **राजतन्त्रं सदा जीव्यात्** काव्यञ्च पठनीयं विद्यते । अस्य कवेः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्यहरिश्चन्द्रमहाकाव्यमपि पूर्वमेव प्रकाशितमासीत् । अस्य कवेः अनूदितकाव्यमपि विद्यते **तस्यैव कृते** इति ।

गोरखाभिजनस्य पाल्पाजनपदे निवासिनः माधवप्रसाददेवकोटावरस्य २००५तमे वैक्रमाब्दे रचितं २०१०तमे वैक्रमाब्दे प्रकाशितं **भारतीवैभवं** काव्यं मनोहरं विद्यते । देवकोटामहोदयस्यैव महारानीलक्ष्मीदिव्येश्वर्याः दानवीरतायाः वर्णनभूतं १९८६तमे वैक्रमाब्दे रचितं, २०३८तमे वैक्रमाब्दे प्रकाशितं **जीवनदानं लघु**काव्यं पठनीयं वर्तते । गोरखाजनपदस्य कट्टेलग्रामाभिजनस्य प्रा.डा.नवराजकट्टेलस्य मातृशतकं, पितृशतकं काव्यमपि महत्त्वपूर्णमस्ति । अस्य कर्मफलमिति नाटके नेपालविजयमिति काव्यनाटकं खण्डकाव्यमयमस्ति ।

रामेछापमन्थलीयाभिजनो भरतराजघिमिरे **मोतीवृत्तं, कृष्णाभिसर्पणमिति** खण्डकाव्यद्वयं ररच । जनकपुरनिवासिनः कविरोहिणीवल्लभपोखेलस्य २०३४तमे वैक्रमाब्दे रचितम् **अभिनवमेघदूतम्** (२०४१), कालीदासीयप्रभावभूतं विद्यते चेत् २०३५तमे रचितं **वकसंहारम्** काव्यमपि प्रशंसनीयमस्ति । पोखेलस्यैव २०३६तमे वैक्रमाब्दे लिखितं २०४२तमे वैक्रमाब्दे प्रकाशितं **मिथिलासौरभम्** काव्यमपि महनीयं वर्तते ।

धादिङजनपदस्य जीवनपुराभिजनो श्रीकुलचन्द्रगौतमः (वि.सं.१९३२-२०१५) अनेकानि काव्यानि व्यरचयत् । **कृष्णाभारणकाव्यम्, भागवतमञ्जरी, गंगागौरवम्, प्रपन्नचर्चा, प्रेमपञ्चपञ्चाशिका, वन्दनायुगलम्, आदर्शदम्पती सीतारामौ, हरिपरिवस्या, शोकमहोर्मि,** इत्यादीनि काव्यरत्नानि रचितानि सन्ति । धादिङाभिजनस्य काष्ठमण्डपनिवासिनः अग्निहोत्रि- गणेशप्रसादगौतमस्य २०३९तमे वैक्रमाब्दे प्रकाशितं ३०७ श्लोके विस्तारितं कुमारबहादुरजोशीसूरेः संस्कृतभूमिकासहितं **प्रपञ्चाप्रपञ्च-प्रकाश इत्याख्यं** लघुकाव्यं अन्यच्च **धिङ्मे कुक्कुरजीवनम्** काव्यं दृष्टिपथमायाति । धादिङाभिजनस्य रामहरिदाहालस्य **अमरभारतीगौरवम्** (२०७३) खण्डकाव्यम् एवं **गतो मदीयो ननु कुत्र देशः** इति कवितासङ्ग्रहोऽस्ति । द्वयोः कव्ययोः कृते संयुक्तरूपेण २०७३ वैक्रमाब्दस्य जयतु संस्कृतम् पुरस्कारः दत्तोऽस्ति ।

लोकनाथलुइँटेलस्य **श्रीरामः शरणं मम** इति काव्यं २०६५ वैक्रमाब्दे प्रकाशितं तस्मिन् वर्षे जयतु संस्कृतं पारितोषिकमपि लब्धम् । दर्शनसारामृतम् इति ग्रन्थश्च जयतु संस्कृतमिति संस्थातः प्रकाशितः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुल्मीधुरकोटाभिजनो वैयाकरणः कविश्च टीकारामपन्थी (१९९३-२०६६) २०२१ तमे वैक्रमाब्दे पौराणिककथायां **रुरुवृत्तम्** काव्यं प्रणिनाय। पन्थीमहोदयस्यैव २०४०तमे वैक्रमाब्दे ५ सर्गात्मकं नेपालनिर्माणस्य ऐतिह्यं, पौराणिकं तथ्यं समादृत्य **नेनेपालकाव्यम्** प्रकाशितमस्ति। पन्थीमहोदयस्य **अश्रूपहारम्** (२०३९) **सुधर्मा** खण्डकाव्यम् (२०४०) च नेपालस्य पूर्वप्रधानमन्त्रिणः जनक्रान्तिनायकस्य विपीकोइरालामहोदयस्य विषये आधारितमस्ति। पन्थीवरस्य २०५४तमे वैक्रमाब्दे प्रकाशितं ३११ श्लोकात्मकं **बुद्धस्मरणं काव्यमपि** स्मरणीयमस्ति। तस्यैव जयतु संस्कृतम् संस्थातः २०५६ तमे वैक्रमाब्दे प्रकाशितं ४७४ श्लोकात्मकं **मङ्गलग्रहः** काव्यं रोमाञ्चपूर्णमस्ति। पन्थीमहोदयेन जयतु संस्कृतम् संस्थातः उत्तरमहाभारत-ग्रन्थनिर्माण-योजना अग्रे सारिता, तत्र च अनेन पञ्चसहस्रश्लोकात्मकं जैनपर्व, जापानपर्व च लिखितमस्ति, तथा च अमरुकपर्व किञ्चित् लिखितं विद्यते।

गुल्मीधुरकूटस्य ऋषिकल्पः पण्डितः भीमकान्तपन्थी **जगदीश्वरवैभवं, जगदम्बिकावैभवं** काव्यं कविताश्च लिलेख। **जगदम्बिकावैभवम्** इति काव्येन जयतु संस्कृतमिति पारितोषिको लब्धः। लक्ष्मीकान्तपन्थीमुकुन्दशरण-उपाध्यायस्य **प्राकृतपोखरा**नामकं प्रकृतिकाव्यं लेखनाथपौडेलस्य **ऋतुविचारकाव्यं** (२०६३ वैक्रमाब्दे) संस्कृतभाषायमनुवादं समकरोत्। तस्य**ऋतुविचारः सानुवादः** इति अनूदितेन काव्येन **२०६३** वैक्रमाब्दस्य जयतु संस्कृतम् इति पारितोषिकः प्राप्तः। **प्राकृतपोखरा** (संस्कृतानुवादकाव्यं) जयतु संस्कृतम् संस्थातः प्रकाशितः। पन्थीमहोदयस्य **काव्यमालिका** (०७५) काव्यसङ्ग्रहेन २०७५ वैक्रमाब्दस्य **जयतु संस्कृतम्** इति पारितोषिकः प्राप्तः।अस्मिन् काव्यसङ्ग्रहे कवितासहितं पञ्चखण्डकाव्यानि संगृहीतानि सन्ति। अस्मिन् ग्रन्थे कविताकाव्येषु ४ सहस्रश्लोकाः सन्ति ।

अर्घाखाँचीजनपदस्य धनञ्जयमरासिनीमहोदयेन कानि चन काव्यानि लिखितानि सन्ति। तेषु काव्येषु **हरिहरप्रार्थनापुष्पाञ्जलिः** (२०५७) काव्यं २०५७ वैक्रमाब्दस्य जयतु संस्कृतम् पारितोषिकेण पुरस्कृतमस्ति। पल्पाजनपदस्य हरिहरशर्मणः **काव्यत्रिवेणी** २०५९ वैक्रमाब्दस्य जयतु संस्कृतम् पारितोषिकेण पुरस्कृतास्ति। अस्मिन् ग्रन्थे कविता, खण्डकाव्यं, लघुनाटकञ्च संकलितानि सन्ति। अस्य अर्यालस्य **तपस्वीकृषीबलम्** इति काव्यं २०५७ वैक्रमाब्दे प्रकाशितमासीत्। पाल्पाभिजनस्य वेणीमाधवढकालस्य **अमरसिंहचरितम्**

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

खण्डकाव्यं २०५२ तमे वैक्रमाब्दे प्रकाशितमस्ति। काव्यम् अमरसिंहस्य जीवनवृत्तं वर्णयति। काष्ठमण्डपस्य भरतराजपन्तस्य काव्यसङ्ग्रहोऽपि प्रकाशितोऽस्ति। अर्घाखाँचीजनपदस्य खिदिमग्रामाभिजनस्य खगेश्वरी-परीक्षितयोः गर्भजो (१९३९-२०२० वि.सं.) दधिराममरासिनी **श्रीरामचरितामृतम्** इति काव्यस्य प्रणयनं व्यधात्। दधिरामस्यैव १९८६तमस्य वैक्रमाब्दस्य सप्तसर्गात्मकं **श्रीकृष्णचरितामृतम्** काव्यमपि महनीयमस्ति। गुल्मी-धुरकोटाभिजनस्य नोमनाथपन्थीवरस्य (विसं. १९७५-२००२) २००० वैक्रमाब्दे रचितं **गण्डकीगौरवम्** लघुकाव्यमपि रमणीयं प्रतिभाति।

वेणीमाधवढकालस्य इतिहासविषयस्य अमरसिंहकाव्यं प्रकाशितमस्ति। **'लिच्छविकालिकानामभिलेखानां साहित्यिकमनुशीलनम्'** शोधग्रन्थः २०६० वैक्रमाब्दस्य जयतु संस्कृतम् पारितोषिकेण सम्मानितः आसीत्। अनेन महाकाव्यमपि लिखितमस्ति। पाल्पाभिजनो नवराजपाण्डेयः ८ विश्रामयुतं **परमानन्दचरितम्** काव्यं २०६८तमे वैक्रमाब्देऽप्रकाशयत्। अर्घाखाँचीजनपदस्य दधिराममरासिनी **श्रीरामचरितामृतम्, श्रीकृष्णचरितामृतम्, गण्डकीगौरवं** काव्यं रचितवान्।

वागलुङाभिजनस्य सुकृतिदत्तपन्तस्य २०५६तमे वैक्रमाब्दे प्रकाशितं २०७ श्लोके विस्तारितं **तारिणीवरिवस्या** काव्यं अत्यन्तं सुन्दरं विद्यते। तस्य महाकाव्यमपि प्रकाशितमस्ति।

दाङजनपदनिवासिनोरामेश्वरशर्मणः -वि.सं. १९७९-२०६०) पूर्वरचितं **पशुपतिदर्शनम्** काव्यं २०५९तमे वैक्रमाब्दे प्रकाशितमस्ति। इदं लघुकाव्यं १३ तरङ्गे विभक्तं दृश्यते। दाङनिवासी अन्यः प्रतिभास्ति भागवतशर्मरिजालः। रिजालः नेपालसंस्कृतविश्वविद्यालयस्य स्थापनायां संस्कृतविद्यायाः संरक्षणे च कृतजीवनोत्सर्गस्य सन्यस्तस्य दाङाभिजनस्य जागेश्वरब्राह्मणस्य जीवनचरित्रमाधृत्य त्रिसर्गात्मकं **जागेश्वरचरितम्** काव्यं प्रणिनाय। दाङजनपदनिवासिनः ठाकुरप्रसाद-आचार्यस्य **शिवलहरी** स्तोत्रकाव्यं कवित्वमयमस्ति। दाङनिवासिना मेघराजन्यौपाने महोयेन **बबैलहरी** इति सुन्दरं खण्डकाव्यं विरचितमस्ति। दाङजनपदाभिजनो हरिप्रसादआचार्यः महाकाव्यं, अष्टाध्यायीग्रन्थस्य भूमिकायां वंशवत्तकाव्यं लिखितवान्नस्ति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कास्कीजनपदस्य प्रा.डा. टीकाराम-अधिकारी (२००७-२०७६) **चन्द्रप्रभा (खण्डकाव्यम्)** (२०५८), **गोविन्दचरितामृतम्** (२०६२) **पद्मपुष्पाञ्जलिः** कवितासङ्ग्रहञ्च(२०६४) प्रकाशितवान्। **चन्द्रप्रभा** पृथ्वीनारायणस्य ज्येष्ठा विमातास्ति। पाल्पानरेशस्य पुत्री चन्द्रप्रभा पृथ्वीनारायणशाहं राज्यसञ्चालने, राज्यस्यैकीकरणे च प्रशिक्षणं अभिप्रेरणाञ्च दत्तवती, अस्मिन्नेव विषये काव्यमाधृतमस्ति। गोविन्दचरितामृतम् टीकारामस्य गुरोः गोविन्दस्य जीवनवृत्तौ आधृतमस्ति। **पद्मपुष्पाञ्जलिकवितासङ्ग्रहेण** २०६४ वर्षस्य **जयतु संस्कृतम् पुरस्कारः** प्राप्तः। **चन्द्रप्रभाकाव्यं** जयतु संस्कृतम् संस्थातः प्रकाशितमासीत्। टीकारामेण जयतु संस्कृतम् इति संस्थायाः उत्तरमहाभारतग्रन्थयोजनायामपि कार्यं विहितम्। स अस्यां योजनायां पञ्चसहस्रश्लोकयुतम् उत्तरमहाभारतस्य गण्डकीपर्व लिखितवान्। अनेकानि अभिनन्दनपत्राणि च अनेन व्यलिखि। पोखराजनपदे नेवारपरिवारे लब्धजन्मा गोपालकिञ्जल्कः वैद्यः संस्कृतस्य विद्वान् आसीत्। अस्य २०६१ तमे वैक्रमाब्दे प्रकाशितेन **हिमाद्रिमहिमा**काव्येन २०६१ वैक्रमाब्दस्य जयतु संस्कृतम् पुरस्कारोऽपि प्राप्तः आसीत्। वैद्यस्य विकीर्णानि संस्कृतपद्यानि च सङ्गृहीतानि प्रकाशितानि च सन्ति।

तनहुँजनपदस्य यदुनाथखनालः **सूक्तिसञ्चयः** (०५७), तदनन्तरं **संस्कृतकवितासङ्ग्रहश्च** प्रकाशितवान्। तनहुँजनपदस्य चूँदीरंघाभिजनस्य आहिताग्नितीर्थराजाचार्यदीक्षितस्य २०६० वैक्रमाब्दे प्रकाशितः **पुत्रोपदेशः** काव्यसङ्ग्रहः स्मरणीयः। अस्मिन् संग्रहे ४२ कविताकणिकाः समाहिताः सन्ति।

सोमनाथसिग्देलः **सुन्दरचम्पू, आदर्शराघवपुष्पाञ्जलिं** किल लिलेख। अस्य प्रतिसंस्कृतसिद्धान्तकौमुद्यामपि पद्यमयी भूमिका च लिखितास्ति। महेशराजदिनेशराजयोः पिता प्रा. नयराजपन्त दिव्योपदेशस्य संस्कृतभाषायां पद्यानुवादं किल चकार। अनेन विविधगणितसूत्राणि च संस्कृतपद्यभाषायां लिखितानि सन्ति। संस्कृतस्य महाकविः कृष्णप्रसादघिमिरे **सम्पातिसन्देशम्, रामविलापखण्डकाव्यम्** व्यलिखत्। काव्यद्वयमपि सातिसयं महत्त्वपूर्णमस्ति। एवच काष्ठमण्डपाभिजनो तेजकेसरी शर्मा **कलमाक्षरकाव्यं** लिलेख।

पाँचथरजनपदस्य एकतिनाभिजनस्य काशीनाथन्यौपानेमहोदयस्य **लाहिडीक्रियायोगसंहिता** २०६१ वैक्रमाब्दे प्रकाशिता। पद्ये रचितोऽयं ग्रन्थो दार्शनिकविषये आधृतोऽस्ति। काशीनाथस्यैव २०६७ मा प्रकाशितं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सन्तोषीमाताकाव्यं स्मरणीयमस्ति । **मीमांसातर्कभाषा** इति दर्शनिकग्रन्थोऽपि अस्ति । **मीमांसानयभूषणम्** दार्शनिकग्रन्थोऽपि पद्यभाषायां लिखितम् । पद्ये लिखिता हिन्दुस्मृतिः अपि अनेन २०६६ वैक्रमाब्दे प्रकाशितास्ति ।

जनकपुरनिवासिनः कविरोहिणीवल्लभपोखेलः दिवङ्गतपश्चात् **भावावर्तः** कवितासंग्रहः प्रकाशितः । अनेन २०६७ वैक्रमाब्दस्य **जयतु संस्कृतम्** पुरस्कारः प्राप्तः । **रामेछ्यभिजनो छविलालढुङ्गेलः (१८९६- १९६३) विरक्तितरङ्गिणीशतकं** किल लिलेख ।

राजपुरोहितस्य प्रयागदत्तपण्डितस्य २०५७ वैक्रमाब्दे प्रकाशितं, स्रग्धराछन्दसि विरचितं २०१ श्लोके प्रसृतं **शिक्षारत्नम्** दार्शनिककाव्यं स्मरणीयमस्ति । सखुवासभाजनपदस्य खाँदबारीग्रामाभिजनस्य रोहिणीप्रसादखनाल (१९९२।४।२२)स्य २०६७ वैक्रमाब्दस्य माघमासे प्रकाशितं ११२ श्लोकेषु प्रसृतं **क्षमा**-काव्यं तदनुप्रकाशितं **गृहस्थकाव्यं** स्मरणीयमस्ति । चित्रवननिवासिना नारायणखानालेन २०७८ वैक्रमाब्दे द्वितीयसंकरणं २०८० वैक्रमाब्दे प्रकाशितं राजेश्वरकाव्यञ्च पठनीयमस्ति ।

जयतु संस्कृतमिति संस्थया संस्कृतभाषायां कविता-काव्यरचनायां सदैव अभिप्रेरणा दत्तास्ति । जयतु संस्कृतम् आन्दोलनस्वर्णमहोत्सवे प्रारब्धा संस्कृतकवितागोष्ठी नैरन्तर्येण सञ्चलितास्ति । ततश्च संस्कृतस्य लेखकाः, भावकाः चिन्तकाश्च प्रभाविता, अभिप्रेरिताश्च सन्ति । अनेकाः प्रतिभाः काव्यरचनायां नाट्यरचनायां संलग्नाः सन्ति । जयतु संस्कृतम् संस्थया २०५४ विक्रमाब्दतः प्रारब्धं, संस्कृतकविसम्मेलनं, नैरन्तर्येण २८ वर्षं यावत् इदं सम्मेलनं प्रचलदस्ति । अनेकेषु स्थानेषु, मूलतः काष्ठमण्डपे अनेकैः कविभिः स्वकीया रचना वाचिता । कविसम्मेलनस्य प्रभावेण प्रा.डा. विष्णुप्रसाददेवकोटावरेण नेपालगौरवं महाकाव्यं विरचितं, प्रा. रामहरिदाहालवरेण नाटकानि रिचतानि, महाकाव्यञ्च रच्यमानमस्ति । संस्कृतकवितासङ्ग्रहः प्रथमपुष्पं २०५९ वैक्रमाब्दे द्वितीयपुष्पं २०७० वैक्रमाब्दे प्रकाशितं वर्तते । प्रथमसंग्रहे ९५ कविताः, द्वितीयसंग्रहे १०३ रचनाकाराणां १४७ रचना प्रकाशिताः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्त्ये

नेपाले भारते च संस्कृतकाव्यकृतीनां रचना प्रक्रिया नैरन्तर्येण अधुनापर्यन्तं प्रचलिता दृश्यते। नेपाले सहस्रः रचनाकारैः काव्यानि, खण्डकाव्यानि, महाकाव्यानि च रचितानि सन्ति। परन्तु दृश्यकाव्यानि नेपाले भारते च स्वपानि एव दृश्यन्ते। रूपकस्य रचनायां काठिन्यं च दृश्यते। नाट्यरचना न केवलं दृश्यकाव्यम् अपितु प्राविधिकविषयोऽपि विद्यते। नाट्यरचनायां, प्रेक्षागृहे नाट्यप्रदर्शनस्य, अभिनयविधानस्य च प्राविधिकी व्यवस्थास्ति। अतः तस्य रचनायं काठिन्यं जायते। कविता-खण्डकाव्य-महाकाव्यरचनायां रचनाकारः स्वतन्त्ररूपेण भावप्रवाहे स्वतन्त्रो भवति। अद्यतनसमये तु न नेपालभारतयोः संस्कृतकाव्यानां रचना भवति, अपितु आविश्वमेव संस्कृतस्य प्रचारत्वात्, अनेकेषु विश्वविद्यालयेषु संस्कृतस्य पठनपाठनव्यवस्थाविधानाच्च सर्वत्रैव संस्कृतकाव्यकृतीनां रचना जायते।

नेपाले लिच्छविकालादग्रेऽपि गोपालवंशीयभूपालानां समये च अत्र संस्कृतभाषा प्रचलति स्म इति अनुमातुं शक्यते। ततः प्रचीनकालादेव अस्मिन् पुण्यतमे आर्षदेशे संस्कृतस्य प्रवाहो दृश्यते लिच्छविकालस्य ग्रन्थाभावेऽपि शिलालेखाधारे संस्कृतकाव्यकृतीनां परिचयो लभ्यते। मल्लकाले शाहकाले तु अनेकानि ग्रन्थरत्नानि अनेकानि नाटकानि, काव्यानि च मिलन्ति। अधुनापर्यन्तञ्च अस्यां भाषायां संस्कृतस्य श्रवणं, लोकव्यवहारे संस्कते वार्ताकरणं, विद्यालयेषु विश्वविद्यालयेषु संस्कृतग्रन्थानमध्ययनं, काव्यकृतीनां, शोधग्रन्थानां लेखनञ्च नैरन्तर्येण प्रचलदस्ति। अतः इयं ऋषिप्रयुक्ता, देववाणीभूता अमरभाषाधुनापि अमरमस्तीति कथयितुं पार्यते। अतः संस्कृतस्य रचनाशृङ्खलायां मयापि इदं काव्यं व्यलेखि।

इदं पृथ्वीशतकं काव्यं मया कोभिड-१९ समये रचितमासीत्। अस्य काव्यस्य कतिपयाः अंशाः मया विविधस्थानेषु श्राविताश्च। संस्कृते काव्यादिग्रन्थलेखने विविधघटनातः अभिप्रेरणा लब्धा। अस्माभिः संस्कृतवाङ्मयस्य विद्वद्धौरेयस्य जगन्नाथत्रिपाठिमहोदयस्य रथयात्रापूर्वकं नागरिकाभिनन्दनं विहितम्। स महिमामण्डितो विद्वान् आसीत्, तस्य ग्रन्थग्रन्थिभेदनसामर्थ्यञ्चासीत्, परन्तु न संस्कृतस्य ग्रन्थाः अस्माभिः दृष्टा, तस्मिन् समारोहेऽपि संस्कृतकाव्यानां वाचनाय यत्नो विहितः, तेन लिखिता कवितापि नैवोपलब्धा। मम मनःखिन्नो जातम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्य विदुषः संस्कृते किं पदचिह्नं विलसति अधुना न किमपि । अनया घटनया मम मनः वारं वरं खिन्नं जायते स्म । अतः किञ्चित् लिखितव्यमिति धारणा विकसिता । संस्कृतभाषायां लेखने अभ्यासो नासीत् । जयतु संस्कृतमिति संस्थायाः समायोजने कविसमवाये वर्षस्यैकवारं कवितां लिखामि स्म । २०७२ वैक्रमाब्दस्य आषाढस्य प्रथमदिनतः गोरखापत्रे संस्कृतभाषायाः पृष्टमपि अस्माकं प्रयत्ने प्रकाशितम् । बाध्यतयाहं तत्र पृष्टसंयोजको जातः । अतः बाध्यतया संस्कृतलेखने मम अभ्यासोऽपि अग्रे गतः । तेनैव अभ्यासेन, गुरुणां प्रेरणया आशीर्वादेन च इदं काव्यम् एतादृशं स्वरूपमवधार्य अवतरिम् ।

काव्यं विलोक्य त्रुटिशोधनं विधाय मां प्रेरयन्तं गुरुवरं प्रा.डा. विष्णुप्रसाददेवकोटावरं, गुरुवरं प्रा. रामहरिदहालमहोदयं सततं नौमि । काव्यप्रणयने सहयोगशीलाय अनुजाय कवये विपश्चिते प्रा.डा. मुकुन्दप्रसादलामिछानेमहोदयाय च धन्यवादं व्याहरामि । जयतु संस्कृतं इति संस्थायाः अध्यक्षयाय डा. बद्रीपोखेलाय च हार्दं धन्यवादं विज्ञापयामि । संस्थायाः कोषाध्यक्षाय रामरञ्जनपौडेलाय, काव्यप्रकाशने सहयोगशीलाय आचार्याय पीपलमणिसिग्देलवराय च धन्यवादं समर्पयामि । अस्य काव्यस्य प्रकाशने संहता अन्ये सहयोगिनः सर्वान् च धन्यवादं व्याहरामि ।

जयतु संस्कृतम्

प्रा.डा. नवराजकट्टेलः
कुमारीगालः, का.म.न.पा.७, काष्ठमण्डपः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विषयसूची

१.	डा.बद्रीप्रसादपोखेल:	प्रकाशकीयम्	३
२.	प्रा.डा.विष्णुप्रसाद देवकोटा	पृथ्वीशतकं प्रति मदीया दृष्टिः	११
३.	प्रा. रामहरिदाहाल:	पृथ्वीशतकमितिखण्डकाव्यस्यानुशीलनम	१०
५.	प्रा.डा. नवराजकट्टेल:	काव्यकारस्योपोद्घातम्	२६

पृथ्वीशतकं खण्डकाव्यम्

१.	गोरक्षदेशस्य सौन्दर्यम्	५३
२.	पृथ्वीनारायणस्य जन्म, संस्कारश्च	५३
३.	पृथ्वीनारायणस्य विवाहे गोरखासौन्दर्यम्	५५
४.	उद्वाहे मकवानपुरसौन्दर्यवर्णनम्	५६
५.	गोरखामकवानपुरयोर्द्वन्द्वम्	५७
६.	पृथ्वीनारायणस्य काष्ठमण्डपगमनम्	५७
७.	इतिहासस्य बोध:	५८
८.	राज्याभिषेक:, प्रयाणं, नवकूटविजयश्च	५९
९.	काष्ठमण्डपविजय:	६१
१०.	चौदण्डीमकवानपुरादिविजय:	६३
११.	इन्द्रकुमार्या: पत्रम्	६३
१२.	पृथ्वीनारायणस्य पत्रम्	६५
१३.	नेपालस्यैकीकरणम्,	६६
१४.	पृथ्वीनारायणस्य सन्देश:	६८

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृथ्वीशतकं खण्डकाव्यम्

१. गोरक्षदेशस्य सौन्दर्यम्

आसीज्ज्योत्स्ना धवलशिखरे चोत्तरस्यां दिशायां
हास्यं तन्वन् मुदितमनसा चान्नपूर्णो गणेशः ।
गायं गायं कलकलरवैः नृत्यमाना त्रिशूली
धावं धावं सलल-गतिका चम्पया सार्द्धमेति ॥१॥

नृत्यन्त्यासीत् शिखरिशिखरे पादपानाञ्च पङ्क्तिर्
गायन् नृत्यन् विहगसुततिर्वेदविद्येव घोषम् ।
गोत्राद् गोत्रात् झरर-झरना गीतमानाः प्रयान्ति
ग्रामेऽरण्ये मृदुलमहिलास्तत्र गायन्त्यबाधम् ॥२॥

कालीदेवी विपुलमनसा ध्यायति ध्येयकाले
लीना सा स्यान्नु महति महाकालगे कालरङ्गे ।
काल्या रूपं भवति बहुधा सौम्यदं भीषणञ्च
सृष्टिं धत्ते विलयति मुदा रक्षिका मध्यकाले ॥३॥

आसीद् बाबा सुशिखरगुहायां तदा स्वर्णकूटे
आशीर्वादं वितरति सदा सिद्धगोरक्षनाथः ।
तस्माज्जातो भुवि परिदृढो रम्यगोरक्षदेशः
रक्षार्थं तच्छ्रुतिपथनयं शाहराज्यं बभूव ॥४॥

२. पृथ्वीनारायणस्य जन्म, संस्कारश्च

पृथ्वीबालो भुवि नरपतेर्भूनृपालाच्च जज्ञे
आसन् फुल्लाः प्रकृतिरचना ह्यार्षदेशे हिमाद्रौ ।
आमोदं तत् जन-जनपदे दिव्यरूपं ततान
वारं वारं स्थलनभचराः गीतनृत्ये ह्यकुर्वन् ॥५॥

संस्कारास्ते श्रुतिविधियुताः पण्डितैः संप्रयुक्ताः
अन्नं वेधं नरपतिकुले साधितं चौलकर्म ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राज्ञैः शीघ्रं सुविधिसहितञ्चाक्षरं पञ्चमाब्दे
प्रेम्णा भक्त्या निजकुलबुधैः शिक्षितोऽसौ नरेन्द्रः ।६।

देष्टा राज्ञं समरजयिनं युद्धविद्यां शिशिक्षे
द्वन्द्वं युद्धं, खुकुरियुगलं, चन्द्रहासं शिशिक्षे ।
जाते युद्धे फलकसहितं ह्यात्मरक्षां शिशिक्षे
शूलं युद्धं समरविशिखं(बाणम्) भिन्दिपालं शिशिक्षे ॥७॥

चाणक्यीयं कुलगुरुमुखात् नीतिशास्त्रं पपाठ
बार्हस्पत्यं नु विदुरनयं शक्तितोऽसौ पपाठ ।
त्यक्त्वालस्यं नयपथयुतं भारतं वै शिशिक्षे
याम्यं शौक्रं बहुनयपथं कूटनीतिं व्यबोधीत् ॥८॥

मातैवासीत् प्रथमसुगुरुः पण्डिता गर्विता च
तस्मै साऽदात् बहुविधनयं द्वन्द्वविज्ञा तदात्वे ।
भूपालेभ्यः प्रकृतिगुरुतो द्वन्द्वविद्यां स लेभे
युद्धाभ्यासात् सततसमरात् युद्धविद्यां स लेभे ॥९॥

पारम्पर्यादुपनयनकं स्वर्णकूटे प्रपन्नं
वाद्यं घोषं मधुरमधुरं गीतनृत्यं बभूव ।
फुल्ला मर्त्या निजजनपदे चोत्सवं मेनिरे ते
दृष्ट्वा राज्ञं प्रकृतिसुनटी नृत्यगानं ततान ॥१०॥

धौते वस्त्रे धनुषि सुशुभे शार्ङ्गवत् सः त्रिपुण्ड्रे
खड्गं हस्ते परशुसदृशश्चोर्ध्ववस्त्रैश्चकाश ।
स्वर्णे कूटे स्फुरितवसनो वायुना स्पर्धमाने
मुग्धा मर्त्या नरपतिवटुं भिक्षमाणञ्च दृष्ट्वा ॥११॥

काल्या उक्तो विजयतुतराम् रामवत् कृष्णवच्च
नाथोऽवोचत् 'भवतु पृथिवीपालको धर्मपालः ।'
कीर्तेर्वृद्धिर्भवतु भुवने द्रव्यवद् राष्ट्रजेता
धानुष्के वै भवतु भुवने पार्थवद् धर्मराज्ये ॥१२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३. पृथ्वीनारायणस्य विवाहे गोरखासौन्दर्यम् -

तारुण्ये वै शिखरिशिखरात् सिंहवत् यो जगर्ज
दृष्ट्वा सिंहं कनकशिखरे ग्रामसिंहा निलिल्युः ।
दातुं चैच्छन् कनकतनयां राज्यलक्ष्मीं विभर्त्तुं
गोर्खाराज्यं परिलसति वै चन्द्रवज्ज्योत्स्नया च ॥१३॥

प्राचीभागे विलसति तदा सेनराज्यं विशाल-
मैच्छत् राजा स्वकुलतनयां राजपुत्राय दातुम् ।
जातो मन्त्रो नृपतिसभया 'इन्द्र'-नाम्नी कुमारी
काम्या जाता युवकनृपतौ सौम्यमूर्तिर्ननर्त ॥१४॥

गोर्खाराज्यं पुलकितमहो राजपुत्रस्य वाहे
ग्राम्याः सभ्या मुदितमनसा फुल्लितास्ते प्रफुल्लाः ।
ग्राम्यैर्मर्त्यैः कनकशिखरं तत्र पुष्पीयति स्म
वाद्यं गीतं प्रतिजनपदं गीयते नृत्यते स्म ॥१५॥ ४।२४।

रम्ये सानौ प्रकृतिमधुरां यज्ञशालां प्रविश्य
काम्ये यज्ञे घृतचरुहुतैरग्निज्वाला नर्नत ।
मोदात् हर्म्यं वसतिपरितः फुल्लभावैर्जहास
आकाशे वै कनकशिखरात् यज्ञधूमश्चकास ॥१६॥
राजपुत्रस्य उद्वाहे प्रकृतिसौन्दर्यम्
राजोद्वाहे विपुलप्रकृतिर्गोरखायां ननर्त
मार्गे मार्गे मुदितजनता गीतनृत्ये ह्यकुर्वन् ।
यात्रा जाता जनपदपथे हस्तिनां वाजिनाञ्च
राज्ञा साकं विपुलजनताः पृष्ठभागं ह्यगच्छन् ॥१७॥

गङ्गां तीर्त्वा नरपतियुवा पूर्वभागमगच्छत्
यात्रा प्रापत् कतिपयदिनैर्हेमकर्णस्य पुर्याम् ।
भव्यं द्वारं सुरपुरमिवेदं विशालं सुरुच्य-
मासीत् राजा पुलकितहृदा स्वागते हेमकर्णः ॥१८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

४. उद्वाहे मकवानपुरस्य सौन्दर्यम्

सौम्यां दृष्ट्वा नृपतितनयां राजपुत्रो मुमोद
मुग्धाः सर्वे कनकरमणीं राजकन्यां विलोक्य ।
लक्ष्मीविष्ण्वोः प्रणय इव ते नेत्रद्वारैः पपुश्च
भूमौ स्वर्गो ह्यपतदिव ते मोहजाले व्यमज्जन् ॥१९॥

तस्मिन् दिव्ये प्रणयदिवसे हेमराज्ये विशेषे
छम्छम्कारैः प्रकृतिसुनटी नर्तमाना बभूव ।
आसन्नद्रौ किल किसलया नर्तमानास्तदैव
शाखायां ते निखिलविहगास्थायिनृत्यं वितेनुः ॥२०॥

उद्याने वै कुसुमलसिते पुष्पगुच्छा जहास
वध्वा साकं कुसुमगिरयः स्पर्धमाना बभूवुः ।
पुत्र्युद्वाहे कुसुमयुवका नृत्यशीला बभूवुर्
हैमी भूमिः सुमधुररसे नृत्यगाने न्यमज्जत् ॥२१॥

वाद्यं नृत्यं लसति परितो नृत्यति द्राग् जनौघो
व्यङ्ग्यं गीतं ह्युभयरसिका विप्रहारं विजह्रुः ।
हास्ये गीते सुमधुररसे ग्राम्यनार्यो न्यमज्जन्
नृत्यन्ती सा क्लमति रमणी राजकन्याविवाहे ॥२२॥

दृष्ट्वा मुग्धः किल नवबधूं राजपुत्रः सलज्जो
जालं वस्त्रं पवनपतितं दृश्यते कौमुदीव ।
मुग्धासीत् सा युवनववरं कामरूपं विलोक्य
सर्वे नेत्रैर्हरिमिव पपुः सुन्दरे मण्डपे च ॥२३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

५. गोरखामकवानपुरयोद्वन्द्वः

पत्न्या साकं गमनसमये विघ्नबाधे च जाते
'गौना'भेदात् कलुषहृदयात् गेहयात्रामरुन्धन् ।
व्यूढां त्यक्त्वा नरपतिवरो स्वस्य गेहं जगाम
गोर्खा क्रुद्धो मकवनपुरात् युद्धनादं चकार ॥२४॥

वर्षेऽन्यस्मिन् स बलसहितं हेमगेहं प्रतस्थे
त्वङ्कारैस्तं नरपतिगणं हेमपुत्रो निनिन्द ।
क्रुद्धो भूपो[११] नु खुकुरिबलैः तत्र नेष्यामि पत्नीं
हुंकृत्वाऽसौ हरिरिव नृपो युद्धघोषं जुघोष ॥२५॥

६. पृथ्वीनारायणस्य काष्ठमण्डपगमनम्

यातः भूपो [१२] निजजनकुलैः पर्वतीयाच्च मार्गात्
चित्लाङ्मार्गात् हरितवनतश्चन्द्रगोत्रं प्रपेदे ।
रम्यात् चन्द्रागिरिसुशिखरात् दिव्यदेशं ददर्श
नाकं दृष्ट्वा ननु नरपतिर्मन्दमन्दं जहास ॥२६॥

वाग्मत्या सलिलं पवित्रजलदं दृष्ट्वा च हृष्टोऽभवत्
भव्यं कान्तिपुरं विलोक्य सहसा मुग्धोऽभवत् भूपतिः ।
सौहास्यं च विहाय कान्तिसहितं शोभां पपौ पानवत्
आर्षाणां च तपस्थलीं श्रुतिधरां शैवस्य बौद्धस्य च ॥२७॥

रम्यास्ताः सरिता विलोक्य नयनैः सप्तैव दृष्टास्तदा
पेयास्ता मनुजैश्चराचरमृगैर्हंसैश्च काकैस्तथा ।
नद्यः सन्ति ह्युदीच्यशैलशिखरात् उच्चैरधो यान्ति च
नाडीं साधु विलोक्य सिञ्चितधरां शान्तां तथा श्यामलाम् ।२८॥

---

११. पृथ्वीनाराणशाहः ।
१२. पृथ्वीनाराणशाहः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुर्गं तत्र शिलोच्चयैश्च परितो व्याप्तं च दृष्ट्वा मुहुः
रम्यं पुष्पवनं विलोक्य परितः क्षेत्रं तथा क्षेत्रिकम् ।
दृष्ट्वा पक्षिगणञ्च नीलगगने भूम्याञ्च गोसन्ततीः
श्रुत्वाऽनाहतनाददिव्यगगनात् मोहङ्गतो भूपतिः ॥२९॥

नत्वा तां शिवपार्वतीं पशुपतिं बौद्धं च सानौ स्थितं
ऐशान्यां शिखरे सुदीर्घसमयात् नारायणं वासितम् ।
कालीं दक्षिणनामिकां प्रणमते याम्यस्य गोत्रे स्थितां
दृष्ट्वाऽमूं धरणीं सुचक्ररचितामैच्छन्नृपः शासितुम् ॥३०॥ ४।२७।

तां विभ्रम्य ह्युपत्यकां शिवकृतां स्वर्णां च शीतां पुरीं
दृष्ट्वा स्वच्छहिमालयं शिवगृहं सौन्दर्यपूर्णं मुदा ।
दृष्ट्वा पर्वतमेखलां सुहरितां शाटीव तद्वेष्टितां
हैमं तत् रजतं हिमैश्च खचितं मुग्धोऽभवद् भूपतिः ॥ ३१॥

७. इतिहासस्य बोधः

ऐतिह्यं च बुबोध धूर्जटिपुरः गोपालवंशावलीं
गुप्तानां खलु ह्यार्यशासनमहो तेपे तपो नेमुनिः ।
यत्रासीद् भरताश्रमं हिममुनेस्तेपे तपो गौतमो
वेदानां ध्वनिगुञ्जितं गुरुवरैः सिद्धैस्तथा ब्राह्मणैः ॥३२॥

राज्यं तैश्च कृतं किरातवरकैर्वर्षं सहस्रं तदा
तत्पश्चादजयच्च लिच्छविनृपो राज्यं व्यधात् वैदिकम् ।
नेपालो बहुविस्तरः सुरपुरे वर्षं सहस्रं तदा
तत्खण्डं हिमवद् बभौ श्रुतिधरं ह्यार्षैश्च देवैस्तथा ॥३३॥

पश्चात् मल्लसुशासनं श्रुतिनयं चोपत्यकायामभूत्
शैथिल्यात् खलु केन्द्रशासनविधौ राज्यं विभक्तं तदा ।
भूपानां खलु दायभागविधिना देशाः गता भागतां
नष्टास्ते च परस्परं बहुरणैः भूपाः स्वयं घातिताः ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सेनाः सन्ति च विस्तृता नतयुताश्चौदण्डिराज्ये कृता
पाल्पातो किल योधनेऽथ क्रमशष्टिष्टां गता भूमिपाः ।
ते तेनुश्च तराइभागसहितं राज्यं तदा विस्तृतं
देशास्ते खलु खण्डिता बलगता दायस्य भागेन च ॥३५॥

ऐतिह्यं च प्रबुध्य राजतनयः सङ्कल्पसंबोधितो
नैपालं सुदृढं विशालभुवने 'कुर्वे च राज्यं पुनः' ।
इत्थं साधु च सिंहगर्जनमिव ! द्रुत्यैव गोर्खामगात्
गोर्खाली करवालशूलकटकान् तीक्ष्णाँश्च कृत्वावसत् ॥३६॥

८. राज्याभिषेकः, प्रयाणं, नवकूटविजयश्च

राजाऽसौ नरभूपपाल-जरतश्चैन्द्रेयपुर्यामगात्
फुल्लोऽभूतद् ह्यभिषिक्तराजतनयो राज्याभिषेके तदा ।
गोर्खा जागृतिमाप्य देशसुदृढे काली प्रसादीकृता
नाथोऽदाच्च नृपाय राज्यततये शुभ्रं वरं शाश्वतम् ॥३७॥

गोर्खावीरसुसैनिकाः शरधरा युद्धाय पञ्जीकृताः
राजाऽसौ पृतनां दृढां समकरोत् युद्धाय सुशिक्षिताम् ।
वीरास्ते च प्रशिक्षिता युवभटा बाणैश्च खड्गैस्तथा
तेऽधावञ्च प्रयाणयुद्धसमये गीतस्य घोषैर्मुहूः ॥३८॥

जय गोरख ! जय गोरख !
जय जय कालि ! जय जय कालि ।
जय जय गोरख ! जय जय गोरख !
जय जय गोरख ! जय जय भवानि हे ! ॥३९॥

ढरर-ढम्म ढरर-ढम्म- ढम्म-भीषणं
रात्रौ रात्रौ गच्छति गोरक्षभूपः ।
ढरर-ढम्म ढरर-ढम्म-ढम्म-भीषणं
रात्रौ रात्रौ गच्छति गोरक्षसैन्यम् ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भटाश्च गोरखा रणाय ते गताः कृपाणकाः
नु पर्वताच्च पर्वतान्नु गण्डकीं विहाय ते ।
त्रिशूलगण्डकीं सुघोरनादिनीं स [१३] मर्दयन्
जलप्रवाहताडनैर्निशापतिञ्च कोपयन् ॥४१॥

निशाचरा रणे नु क्रीडका रणे नु जीविता
त्सरुप्रियाः सशूलकाः सबाणकाः सखड्गकाः ।
सुकौशला रणे च नर्तने कालभैरवा
भटाश्च गोरखा रणाय ते गताः कृपाणकाः ॥४२॥

तदा नवप्रदीप्तकोटकं विदारयन् धरां
विमर्दयन् प्रसुप्तसुप्तकाञ्च शत्रुसैनिकान् ।
छछं छछं विघातयन् सुसैनिको गणो गतो
रणं ननाद गोरखा स्वराष्ट्रदेशवृद्धये ॥४३॥

हताश्च सैनिका प्रमण्डलस्य नायका यदा
तदाजयन् हि कालिकाऽनुकोटकान् सुरक्षकान् ।
कृपाणकैः सुबाणकैः सुछेदयन् नु मस्तकं
सुगोरखाऽजयत् प्रकान्तियुक् कोटसुन्दरम् ॥४४॥

अन्यं सैन्यदलं जगाम सहसा मत्तेन शौर्येण च
हुंकारै र्ननु वेलकोटशिखरं दुर्गञ्च तद् भीषणम् ।
दुर्लङ्घ्यं किल शैलदुर्गभयदं ह्युच्चैश्च सेनायुतं
सा शौर्येण भयेन तद्विलसिता युद्धाय सेना गता ॥४५॥

पाषाणैः सहसा प्रहारक-रणैर्दण्डैश्च ते चिक्षिपु-
रस्त्राणां खलु वर्षणैः प्रभयदै र्गोर्खाभटा मारिताः ।
कुर्वन्तः समरं परस्परदृढं ह्यग्रे गताः सैनिकाः
रामस्येव च रामरावणरणो जातो रणो भीषणः ॥४६॥

---

[१३]. पृथ्वीनाराणशाहः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जित्वा तन्ननु बेलकोटशिखरं दुर्गं तथा भीषणं
छिन्नास्ततत्समरे कृपाणपरिघैर्भिन्ना भटा मारिताः ।
तच्चिम्टेश्वरदुर्गतश्च बहुशः युद्धे भटैर्घातिता
सेना कान्तिपुरस्य भीषणरणात् दुर्गादधावत्तदा ॥४७॥

९. काष्ठमण्डपविजयः

दुर्भेद्यं नवकोटकं परिदधद् दुर्गं च सैन्यं तथा
युद्धेऽन्ये सुभटा गता शिवपुरीं प्रापन् च शैलोच्चयम् ।
दृष्ट्वा तां स्मितकाष्ठमण्डपपुरीं हर्षैश्च फुल्लायिताः
पश्यन् तां किलशैलतः समरतोऽगर्जत् तदा केसरी ॥४८॥

साँखूनाल्दुम-दोलखा-पनवतीः साँगा-वनेपापुरीं
पूर्वस्यां च विजित्य राजपुरुषान् नारायणोऽभून्नृपः ।
शैलं ते परिलङ्घ्य पूर्वशिखरं जग्मुः किरातस्य च
राज्ये प्राप्य सुसैनिकास्तु विरता नेपालगुप्त्यै तदा ॥४९॥

गोर्खालीसुभटाः जयाय सहसा कीर्तेः पुरं ह्यागता
युद्धं तत्र बभूव भीषणतमं संयुक्तचम्वा सह ।
आगच्छच्च विशालसैनिकदलं युद्धाय कीर्तेः पुरं
गोर्खालीपृतना च सैनिकगणैः संहारिता द्राविता ॥५०॥

दिग्बन्धेन कुबुद्धिना नृपतिना साकं च युद्धं कृतं,
शूलैस्तोपयुतैश्च सैनिकदलैर्दुर्गेऽभवत् संरणः ।
विख्याते मकवानराजभवने युद्धाय सेना रता
राजा गुप्तिमगाद् विहाय नगरं दृष्ट्वा च गोर्खाभटान् ॥५१॥

सौवीराः किल मीरकाशिमभटा युद्धाय जग्मुश्च ते
तोपैर्गोलिकया युताश्च सहसा सज्जीकृतास्तत्र ते ।
चम्वा ते ननु ह्यर्धरात्रिसमये ह्याक्रम्य भस्मीकृता
मुस्लीमाः खलु हेमकर्णनगरे गोर्खाभटैर्द्राविताः ॥ ५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गोर्खाली किल वीरसैनिकगणः कीर्तेः पुरं तत्पुनः
सा सेना च रणं व्यधात् सकुशलैर्नारायणो देशिकः ।
शस्त्रास्त्रे च ववर्ष तोयवदहो !बाणान् शिलान् शूलकान्
तत्रत्यं समरं विजित्य सहसा राजाऽभवत् हर्षितः ॥५३॥

गोर्खाली च ससैन्यभूपतिवरश्चेन्द्रस्य यात्रोत्सवे
तत्राक्रम्य च काष्ठमण्डपपुरीं सिंहासने सोऽवसत् ।
तद्युद्धेन विना ह्युपागतमहो भाग्यस्य चान्या गतिर्
नेपालं च सुरम्यरम्यतिलकं राजाऽकरोत् सुन्दरम् ॥५४॥

यात्रां कारितवान् च भैरवगणान् नत्वा कुमारीं पुनर्
देव्याः प्राप्य च खड्गकं शुभवरं मुग्धोऽभवत् केसरी ।
पूजां कारितवान् तदा रिपुदलध्वंशाय पृथ्वीनृपो
मर्त्यान् मोदितवान् स्वकीयकिरणैर्नेपालजैर्रश्मिभिः ॥५५॥

तत्पश्चात् ललिताञ्च सुन्दरपुरीं युद्धं विना सोऽजयत्
युद्धं भक्तपुरेऽभवत् प्रभयदं तत् सिंहनादं यथा ।
वर्षावत् शरपुष्पवृष्टिरभवत् सङ्ग्राममध्ये द्वयोः
प्राहार्षुः किल गोलिकामुभयतो युद्धे च तद्भीषणे ॥५६॥

तेऽकार्षुः किल छत्रभङ्गमजयं दुर्गं त्वभेद्यं भटैः
राजेन्द्रश्च ययौ पराजिततया काशीं पुरीं मोक्षदाम् ।
पृथ्वी चैव रराज राजभवने तारापथे ग्लौरिव
नेपालः शुशुभे च विश्वभुवने कैलाशवत् द्यौरिव । ५७॥

लोकानां परिपालनं विदधता राजा च स्नेहान्वितो
लोकास्ते मुमुदुः परस्परमहो ! धर्मेण राज्ये कृते ।
व्यापारे शिवपूजनेऽग्रगमने यात्राविधाने तथा
उद्वाहे नयलब्धये नृपतितो राज्येऽभवत् सुस्थितिः ॥५८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मल्लानां समये परस्परभिया मार्गं ह्यरुन्धँश्च ते
यात्रायां विधुपर्वणि जिनमुनेर्ध्याने च स्नाने तथा ॥
शिष्याणां प्रतिबोधने प्रवचने शास्त्रस्य चालोडने
बाधासीच्च परस्परं भययुजः त्रस्ताश्च लोकाः सदा ॥५९॥

१०. चौदण्डीविजयम्

राज्याङ्गं सुदृढं विहाय परितः पूर्वं गतो भूपतिर्-
गोर्खालीसुभटाश्च भूपभयदा कल्लोलवद् सत्वराः ।
सोऽधावत् पुरतः सुपूर्वशिखरे ह्यालोडयन् केसरी
चौदण्डीपुरतः विलोड्य समरं शत्रूँश्च सिंहोऽजयत् ॥६०॥

चन्द्रार्कौ सुयुतौ सुकेतसहितं टिष्टां गतो नायको
नेपालस्य च शासको हिमवतः राज्यस्य सम्पोषकः ।
राजाऽभूत् जननीव रक्षणकरः सन्तानसम्पालको
नेपालः शुशुभे जनानभयदं हैमीयराज्यं मुदा ॥६१॥

गौराङ्गाश्च पलायिता भयकरात् दुगर्म्यचम्वालयात्
सन्धौ विग्रहदण्डदाननिपुणे पृथ्वीनृपे शासिते ।
राज्यं तच्च सनातनं श्रुतियुतं न्यायेन यच्चार्जितं
दाढ्यं चार्षमयं विभेदरहितं नेपालसौराज्यकम् ॥६२॥

११. इन्द्रकुमार्याः पत्रम्

राजन् ! हे क्षितिपाल ! मां प्रणय हे चैकान्ततो हर्म्यतस्
त्यक्त्वा गच्छसि दूरदेशविपिने मूर्च्छाङ्गताहं प्रिया ।
प्रासादे जनसङ्कुले जनयुते कोलाहले सद्मनि
नैर्जन्यं ह्यनुभूयते प्रतिदिनं पत्युर्वियोगेन वै ॥ ६३॥

चेतो गच्छति गोरखाजनपदे स्वर्णस्य कुट्टे नवे
सौन्दर्यं वनवाटिकाहिमनदञ्चाभाति मे मानसे ।
छायास्ये तव भूपते ! प्रियपते चित्ते च मां स्थापय
क्लिन्नाहं निजनेत्रवारिपतनैः दग्धा च शोकाग्निना ॥६४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देवेशं ज्वलनं प्रपूज्य विधिना तान् वै परिक्रम्य च,
सिन्दूरञ्च त्वया प्रसन्नमनसा दत्तं समन्त्रं शुचिः ।
साक्षीकृत्य जनान् विवाहविधिना हेमाद् गृहाच्च्याविता,
को हेतुर्मम नाथ हापनविधौ पत्नीकृताया बत ॥६५॥

बालाहं किमपीह राजविषयं जानामि नो नाथ हे
प्राणास्त्वं मम जीवनं हि नयनं सारोऽसि चात्मासि भो ।
बालाहं किल व्याकुला विधिवशान् मत्सीव चाद्भिर्विना ।
सत्वं मे हृदयं गतिश्च मनसो मृत्योर्हि मां जीवय ॥६६॥

एकान्ते परिरोदिमि प्रियपते ! मूर्च्छाङ्गता चेतसो
नारीणां पतिरेव यज्ञपुरुषो भर्ता गुरूणां गुरुः ।
या छायेव सदानुगच्छति विभो ! वृक्षस्य मर्त्यस्य वा
चाभायुक् सुधवो बिभर्तु महिषीं राज्यस्य लक्ष्मीरिव ॥६७॥

रिक्तास्मीति च हीनभावसहितो ह्यात्मा मदीयो गतः
पत्युः प्रेम विना न जीवनरुचिं प्राणा मदीया गताः ।
सौन्दर्यं मम त्वं च त्वं मम मनो भोक्तासि द्रष्टासि भो
भोक्ता नास्ति नु पुष्परागविभवैः किं क्रन्दनैः रोदनैः ॥ ६८॥

प्रासादे खलु शिक्षिता गुरुवरैर्विज्ञान-ज्ञानं तथा
खड्गं चालयितुं च शत्रुविजयं सम्मुष्टियुद्धं तथा ।
शूलं पातयितुं च घोटकरणं नेतुं महाकुञ्जरं
युध्येऽहं भयदे रणे च रथिनी भूत्वा त्वदीये नृप ! ॥६९॥

इन्द्राहं किल पाकशास्त्रनिपुणा मात्रा च संशिक्षिता
भक्तं वामृत-व्यञ्जनं रसमयं क्षीरं तथा कूर्चिकाम् ।
आज्यं वा नवनीत-गोरसमयं हैयङ्गवीनं तथा
हस्तैः त्वां खलु भोजयामि सततं शूल्यं रसालां मधुम् ॥७०॥

शून्यं वासं प्रकृतिपरितः चित्तदग्धं समन्तात्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शून्यं हार्दं सुनयनरसैः प्लाविताहं सदैव ।
गर्ते मग्ना किरणरहिता ह्यन्धकारे निमग्ना
एषा बाला पतिविरहिता प्राणरिक्तेव जाता ॥७१॥

निद्रा नो न च भोजनं ह्यनशनैर्जाता च तन्वङ्गिनी
मित्रं नो न च गायनं न शयनं चिन्ताकुलैर्दंशिता ।
त्यक्ता सर्वजनैस्तथा पतिवरैस्त्यक्ता च किं दैवतैः !
पत्नीं कालमुखे मृतेवपतितां मृत्यो हिं मां जीवय ॥७२॥

१२. पृथ्वीनारायणस्य प्रेयस्यै पत्रम्

इन्द्रे ! हे मम वल्लभे सुनयने ! श्रीमानदे भोगदे
देवि ! त्वं हृदयेश्वरी कृशकटी जायासि प्राणेश्वरी ।
अत्यूढे मम जीवने प्रियतमे ! चित्रासि मे चेतसि
स्मर्ताहं तव जीवनस्य महिषी गोरक्षराज्ञी भव ।७३।

हे रामे ! सहधर्मिणी सुरमणी त्वं वीरभार्या प्रिया
पत्नी त्वं च सुवासिनी च सुभगा त्वं दूरदेशे स्थिता ।
छायासि मम जीवने सुनयने साध्वी सतां त्वं प्रिया
प्रासादस्य च सिंहिनी स्मितमुखी गोरक्षदेशस्य च ॥७४॥

को दोषो भण ! मे विवाहसमयेऽरुन्धन् च ते पद्धतिं
गोर्खासीत् तव स्वागते मधुमयैर्गीतैश्च नृत्यैस्तथा ।
खिन्नोऽहं च निवर्तितस्तव गृहात् गोर्खा नतास्योऽभवत्
गोर्खायं तव स्वागताय रमते गोरक्षराज्ञी भव ॥७५॥

घण्टानां ध्वनिरेव विध्वनति वै प्रज्वाल्य चारार्तिकां
गङ्गाया ध्वनिरेव हि ध्वनति सु-प्रख्यापयन् कौमुदीम् ।
मन्दं कौति च कोकिलः सुमधुरं केकी सदा नृत्यति
पुष्पं नृत्यति वृक्षपत्रसहितं ते स्वागते भो प्रिये ! ॥७६॥

उद्घाट्य प्रसृतं कपाटकनकं गोरक्षदेशं विश

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सौन्दर्यं च प्रसार्य तत्सुललितं गोरक्षकं द्योतय ।
वीरान् पालय पोषणैश्च सततं गोरक्षराज्यं तव
अत्रागत्य हि दूरतः प्रियतमे गोरक्षलक्ष्मीर्भव ॥७७॥

इन्द्रे त्वं हि नवे नवे प्रियतमे स्वप्नायिता भो चिरं
चेन्द्रे त्वं कमनीयचारुनयने ! हृद्यासि प्राणा असि ।
उत्प्लुत्य प्रणदीं विलङ्घ्य शिखरं स्वर्णस्य कूटे विश
चौतारापदवीं विभूष्य नितरां गोरक्षराज्ञी भव ॥७८॥

१३. नेपालस्यैकीकरणम्,

श्रीकालीनयरक्षिता सुरवरैर्नाट्याधिराजैर्धृता
हैमैः शैलशतैश्च शैलसुतया शोभा सदा वर्धिता ।
आर्षेःप्राक्समये तपो बहुकृतं वर्षे हिमाह्वे मुदा
गोर्खेयं भुवि राजते प्रकृतिजा हिन्दुस्थली सत्स्थली ॥७९॥

पूर्वस्यां ननु ब्रह्मपुत्रतटिनी ह्यार्षस्य गाथां मुदा
नित्यं गायति वेदमन्त्रमनिशं रामस्य दिव्या धरा ।
गङ्गा गायति दूरपश्चिमतटे गाङ्गाधरं सुस्वन-
माहूतो नयपालभूपतिरयं रक्षाय प्राक्संस्कृतेः ॥८०॥

कैलाशादुभयोर्नदी प्रवहति प्रोद्वाह्य हैमं जलं
नित्यं मानसरोवरे विधिरयं ह्याद्याञ्च सृष्टिं व्यधात् ।
गङ्गा गच्छति दक्षिणे विधिसुतश्चैन्द्रेयदिश्यां सदा
अण्डाकारसुरेखया विलसिता ह्यार्यस्य दिव्यस्थली ॥८१॥

आक्रान्ता खलु ह्यार्षभूमिरखिला म्लेच्छैश्च दुष्टैस्तदा
साक्रान्ता खलु संस्कृतिः श्रुतिकृता नष्टा च देवस्थली ।
गोप्तुं दिव्यसनातनश्रुतिमयं राष्ट्रं तथा संस्कृतिं
यः पृथ्वी करवालयुङ्नरपतिर्युद्धस्य घोषं व्यधात् ॥८२॥ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकोऽसौ नयपालभूमितनयो म्लेच्छान् सदा तर्जयन्
सिन्धुल्यां विपिने च दुर्गशिखरे म्लेच्छान् जघानाखिलान् ।
म्लैच्छाः सप्तदशाधिकं ननु शतं (१७००) सेनाश्च व्यापादिता
धावन्तोऽसुरसैनिका रणभयात् शेषाश्च मूर्च्छाङ्गताः ॥८३॥

वीरास्ते किल सिक्किमस्य सुधरां भूटानदेशं तथा
प्राप्तास्तत्र च सन्धिविग्रहकृते नेपालदार्ढ्याय च ।
रक्षायै किल तिब्बतात् हिमगिरेः कास्कीपरात् पर्वतात्
भूपोऽसौ कृतवान् प्रबन्धनपरं नेपालसौख्याय च ॥८४॥

युद्धे यो नवकोटकं च विजयन् कान्तिं पुरीमभ्यगात्
त्रैराज्यं ह्यचलं विरच्य सहसा पूर्वं गतो वायुवत् ।
कौशिक्याश्च तरङ्गभङ्गविजयी रामस्य सेना यथा
पूर्वस्यां पृतना तदीयजयिनी टैष्टीञ्च प्रापत् तटीम् ॥८५॥

चन्द्रार्कं शुभकेतनं पवनगं संस्थाप्य टिष्टातटे
कल्लोलैः सह वीरता च कथिता नेपालकीर्तौ शुभा ।
गौराङ्गाश्च पलायिता रणभयाद् गोर्खाचमूभीषणात्
युद्धाद् युद्धभयाच् चकार हहहा सेना च तेषां तदा ॥८६॥

हुङ्कारैः रणकेसरी निजशरैर्गौराङ्गसेनामहन्
दीपे पुत्तलिकेव सिंहसदने घृष्टीव तत्राऽभवन् ।
वृक्षा मारुतपातिता इव तदा म्लेच्छास्तदा शायिताः
पृथ्वीभूपतिना युधिष्ठिर इव प्राधिष्ठितं शासनम् ॥८७॥

गोर्खालीसुभटैः विजित्य मुगलान् हत्वा च म्लेच्छान् तदा
हैमीयञ्च धरा विशालसुदृढा ह्यार्यस्थलीनिर्मिता ।
स्वातन्त्र्यं परिपाल्य शैलतनयो मूर्तिर्महासाहसो
देशं हैममम् दधौ त्रिशतकाद् सोऽयं सदा राजते ॥८८।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेपाले खलु नीलकण्ठपशुपो रराजते शोभते
ह्याविश्वं किल शान्तिभावसहितं विश्वं सदा सेवते ।
नेपालः कलया च नाकसदृशो नित्यं धरा भ्राजते
देवानामपि दुर्लभा श्रुतिमयी नेपालभू राजते ॥८९॥

१४. पृथ्वीनारायणशाहस्य सन्देशः

सर्वेषां नयपालिनां स्ववसतिर्नेपालदेशो गृहम्
एषा पुष्पसुवाटिका मधुमयी सर्वे वयं सेवकाः ।
सम्मानं च परस्परं भवतु नो भोगे तथा शासने
सेवायां प्रतिरक्षणेऽरिदलने नेपालगुप्तौ मुदा ॥९०॥

सर्वेषां बलयोगदिव्यतपसा नेपालदेशः कृतः
पाण्डेबस्न्यतयुद्धविज्ञमगरा घर्तीगुरुङ्गादयः ।
एतेषां च पराक्रमेण कुशलात् वीरेण शौर्येण च
वीराणां बहुदुःखयत्नसबलैः हैमीयदेशः कृतः ॥९१॥

नेपालोऽस्ति च प्रस्तरे तरुलवद्[१४] मध्ये द्वयोर्देशयोश्-
चीनीभारतयोश्च मध्यवसुधा नेपालभू राजते ।
धूर्ताः सन्ति च कूटनीतिरचनायान्ते रणे घातने
कुर्यान्नो किल तैश्च 'जाइकटकं' कुर्यात् 'झिकीतत्कटम्' ॥९२॥

गौराङ्गा बहुधूर्तका रणनुता नेपालवैरीकृता-
श्चाभूवन् बहुसैनिका बहुबला अस्त्रैश्च शस्त्रैर्वृताः ।
तैः साकं सुविचारणैर्दृढनयैः शौर्येण ज्ञानेन च
शान्तिं वा समरं जयाय कुरुतान् नेपालविज्ञो महान् ॥९३॥

नेपाले परितो दृढं ह्यरिनुतं भूयाच्च दुर्गो महान्
भूयासुर्दृढसैनिका इषुयुता नेपालरक्षाय ते ।
चाराः सन्तु निरीक्षिताः सुपठिताः कार्येण दक्षीकृताः

---

[१४].तरुषु लीयते इति तरुलः -कन्दमूलमत्यिर्थः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कौलीना ननु देशरक्षणपराः, सेना भवेत् लौहवत् ॥९४।

सर्वे सन्तु सनातने श्रुतिपथे ह्यार्षेयधर्मे सदा
वित्तान्नं किल वृद्धये पशुधनं तद् ह्यार्जने रक्षणे ।
चातुर्वर्ण्यजनैः परस्परमहो कार्यं कृतं स्यान्मिथस्
ताभिः पुष्पसुवाटिका सुरचिता त्यागेन शौर्येण च ॥९५॥

सूर्यो वारि च मेदिनी च पवनो ह्याकाशचन्द्रौ तथा
सस्तापः किल शीतता च ह्यनलो नो कस्यचित् तद्धनम् ।
सर्वेषां खलु सौख्यदं प्रतिदिनं सेवाय दानाय च
मर्यादा खलु रक्षिता यदि जनैर्देशो भवेत् नो दृढः ॥९६॥

गौरङ्गा न भवन्तु राजभवने वैदेशिका रञ्जका
नेवारस्य च गाननृत्यमधुरैर्भूयात् मनोरञ्जनम् ।
वस्त्राणां वयनं च धातुखननं चोद्योगसञ्चालनं
व्यापारः किल स्थापितो बहुविधो मुद्रा भवेत् चार्जिता ॥९७॥

वैद्याः सन्तु च नित्यशो जनपदे ग्रामे तथा मन्दिरे
पथ्याश्चौषधयः लसन्तु परितः सानौ, वने पर्वते ।
विद्यानाञ्च प्रकाशनं प्रभवतु ह्यष्टादशार्थादयः
सम्मानो विदुषां लसन्तु परितः शिक्षा भवेदुन्नता ॥९८॥

विज्ञाः सन्तु च देशनीतिनिपुणा न्यायालये पण्डिताः
सामान्या जनताश्च प्राप्नुयुरिति न्यायं शुभं शासनम् ।
राजा चास्तु व्रती हि राजभवने भूयाद् व्रती सा प्रजा
हैमीयं वसुधा च पूजितपरा नेपालमाता सदा ॥९९ ॥

नेपालो भुवि राजते रजतभं ज्योतिस्सदा द्योतयन्
गङ्गेयं हिमदेशजा अमृतपाः क्षालन्ति बाह्यान्तरम् ।
आर्षाणाञ्च तपस्थली श्रुतिधरा ह्योङ्कारनादान्विता
सेयं जीवतु विश्वबीजजननी नेपालमाता सदा ॥१००॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति नेपालस्य गोरक्षजनपदस्य कट्टेलग्रामाभिजनेन पराशरगोत्रस्य
रोहिणीदेवीहोमनाथयोः प्रपौत्रेण यदुमायाटीकादत्तयोः पौत्रेण,
दुर्गाकुमारीहरिकृष्णयोः
पुत्रेण पाराशर्येण नवराजकट्टेलमहोदयेन विरचिता
२०७७ वैक्रमाब्दस्य श्रावणस्य ४ दिनाङ्के प्रारभ्य भाद्रमासस्य
४ दिनाङ्के पूर्णताङ्गताकाव्यरचना ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुइँटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रम्हाण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9902-1-9
9 789937 990219

Jayatu Sanskritam, Kathmandu, Nepal